❋ ओ३म् ❋

वर्षम् ९
सं० १

Vol 9
No. 1

कश्मीरमण्डलान्तर्वर्तिश्रीनगरस्थायाः

# संस्कृत-साहित्य-परिषद-

त्रैमासिकी

पत्रिका

श्रीः

QUARTERLY JOURNAL OF THE

## Sanskrit Sahitya Parishad

SRINAGAR ( Kashmir )

वार्षिकं मूल्यम्
१)

आषाढः
१९९७ वि०

Printed by Pt. Raghunath Chander Shastri, at the V. V. R. I. Press,
17, Maclagan Road, LAHORE.

# विषयसूची ।



| सं० | विषयः | लेखकः | पृष्ठसं० |
|---|---|---|---|
| १ | वैदिकविवाहवयोव्यवस्था | पं० धर्मदेवः वाचस्पतिः | १—६ |
| २ | श्रुतिविज्ञानवैशद्यं वरीयः | पं० नत्थूरामः शास्त्री | ७—६ |
| ३ | संस्कृत-गीतिका | पं० परमानन्दः शास्त्री | १०-११ |
| ४ | वायुयानानामाविष्कारेतिहासः | पं० दीनानाथः शास्त्री | १२-१४<br>१७, २१ |
| ५ | सैनिकं शिक्षणम् | पं० प्यारेलालः एम्. ए. | १४-१६ |
| ६ | ब्रह्मचर्य्यम् | पं० विपिनचन्द्रः शास्त्री | २२-२५ |
| ७ | संस्कृतभाषा | पं० बलजीनाथः | २६-२७ |
| ८ | पाश्चात्यानां वैदिक-भाष्यसरणिः | पं० सीतारामः एम्. ए. | २८-३४ |
| ९ | आधुनिकी दशा | पं० कुलभूषणः | ३५-३६ |
| १० | विविध-समाचाराः | | ३७-४० |



सूचना—सर्वे लेखाः प्रायो लेखकमहानुभावानां भाषामतानुसारेणैव प्रकाशिता अतस्तेषामुत्तरदायिनस्त एव नतु सम्पादकाः ।

# श्रीः

उन्मिष्याज्ञनताहितार्थपरमा श्री-सूक्तभाजां रुचिः,
सद्धर्मे विनये तमोऽपहनने विद्याप्रचारे शुभे।
न्याय्याचारविचारसाररुचिरा नीतिः सदा वर्धतां,
श्रौती चापि सरस्वती वितनुतां वृद्धिं समाजेऽमलाम् ॥

[विश्वबन्धोः]

## वैदिक-विवाहवयोऽव्यवस्था

ले०—श्रीधर्मदेवः 'विद्यावाचस्पतिः'

'ब्रह्मचर्येण कन्या' इति मन्त्रे श्रीसायणाचार्यो ब्रह्मचर्यस्यान्वयं यूना सह मन्यत इति श्रीशास्त्रिमहोदयानां कथनं सर्वथाप्यसत्यम्। इदमस्ति श्रीसायणभाष्यमस्य मन्त्रस्य "अत्रापि ब्रह्मचर्यं प्रशस्यते। (कन्या) अकृतविवाहा स्त्री ब्रह्मचर्यं चरन्ती तेन ब्रह्मचर्येण युवानं युवत्वगुणोपेतम् (पतिम्) उत्कृष्टं पतिम् (विन्दते) लभते।"

अत्र सायणाचार्येण कन्यया सह (ब्रह्मचर्येण) इत्यस्य सम्बन्धः स्पष्टं स्वीकृतोऽत एव ब्रह्मचर्यं चरन्तीति तद् विशेषणं प्रदत्तम्। अत्रत्यस्य (विन्दते) इति पदस्यार्थो यद्यपि सायणेनात्र 'लभते' इत्येव कृतस्तथापि 'त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती। ऊर्ध्वं तु कालादेतस्माद् विन्देत सदृशं पतिम्' (मनु० ९।९०) इत्यादौ यथा कुल्लूकादिभिः सर्वैरपि भाष्यकृद्भिः "विन्देत स्वयं वृणीत" इत्यर्थः

कृतस्तथात्रापि करणीयः। 'ब्रह्मचर्यम्' इति पदस्य मुख्यार्थस्तु सायणाचार्यादिभिः सर्वैरपि 'ब्रह्म वेदस्तदध्ययनार्थमाचर्यमाचरणीयं समिदाधानभैक्ष्यचर्योर्ध्वरेतस्कत्वादिकं ब्रह्मचारिभिरनुष्ठीयमानं कर्म ब्रह्मचर्यम्' ("ब्रह्मचर्येण तपसा राजा राष्ट्रं विरक्षति" इति मन्त्रव्याख्यायां सायणः) "ब्रह्मणि—वेदात्मकेऽध्येतव्ये चरितुं शीलमस्येति ब्रह्मचारी" (ब्रह्मचर्यसूक्तस्य प्रथममन्त्रव्याख्यायां सायणः) इत्यादिव्याख्याद्वारा वेदाध्ययनतदर्थस्मर्यमाणव्रतरूप एवाङ्गीकृतः।

"मुख्यामुख्ययोर्मुख्ये कार्यसम्प्रत्ययः" इतिन्यायमनुसृत्य 'ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्' इत्यत्रापि वेदाध्ययनरूपमुख्यार्थग्रहणमेवोचितम्। 'अनड्वान् ब्रह्मचर्येण' इत्यादौ (तु) वेदाध्ययनरूपार्थासम्भवाद् गौणार्थग्रहणमेव युक्तम्।

'त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम्' (यजु० ३।६०) 'त्वष्टृमन्तस्त्वा सपेम पुत्रान् पशून् मयि धेहि प्रजामस्मासु धेहि अरिष्टाहं सह पत्या भूयासम्'। (यजु० ३७।२०) 'अहं केतुरहं मूर्धा अहमुग्रा विवाचनी। ममेदनु क्रतुं पतिः सेहानाया उपाचरेत्'। (ऋ० १०।१५९।२) 'उताहमस्मि संजया पत्यौ मे श्लोक उत्तमः'॥ (ऋ० १०।१५९।३) इत्यादयो वैदिकमन्त्रा महिलाभिरुच्चारणीया इति संस्कृतभाषायां कृतातिस्वल्पपरिश्रमोऽपि सम्यगवगन्तुं शक्नोति। तैत्तिरीयसंहिताभाष्येऽपि श्रीसायणेन 'सुप्रजसस्त्वा वयं सुपत्नीरुपसेदिम। अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम्'। (भा०—वयं त्वामुपसीदामः कीदृश्यो वयम् शोभनः पतिर्यासांताः सुपत्न्य इत्यादि) "धातुश्च योनौ सुकृतस्य लोके स्योनं मे सह पत्या करोमि। संपत्नीवत्याहं गच्छे समात्मा तनुवा मम॥ आशासाना सौमनसं प्रजां सौभाग्यं तनूम्। अग्नेरनुव्रता भूत्वा संनह्ये सुकृताय कम्।" इत्यादयो मन्त्राः स्त्रीभिरुच्चारणीया इति स्पष्टमलेखि स्त्रीपरकश्च तेषामर्थो व्याख्यातः।

वैदिककाले "गोधा घोषा विश्ववारा पालोपनिषन्निषत्" इत्याद्याः शतश ऋषिका आसन्निति सर्वसम्मतो विषयः। महाभारतपुराणादिष्वपि "अत्र सिद्धा शिवा नाम ब्राह्मणी वेदपारगा, अधीत्य सकलान् वेदान् लेभेऽसन्देहमक्षयम्"॥ (म० भा० उद्योग० प० १०८।१८।१६)

"सततं मूर्तिमन्तश्च, वेदाश्चत्वार एव हि।
सन्ति यस्याश्च जिह्वाग्रे, सा च वेदवती स्मृता"॥
(ब्रह्मवै० प्रकृतिखण्डे १४।६४)

इत्यादीन्यनेकप्रमाणानि महिलानां वेदाध्ययनस्य (अत एव चोपनयनस्य विषये) उपलभ्यन्ते यानि 'ब्रह्मचर्येण कन्या' इत्यादिमन्त्रेषु वेदाध्ययनरूपमुख्यार्थमेव प्रत्याययन्ति।

कल्पशब्दः शास्त्रविध्यर्थकोऽपि भवति तस्मात् "पुराकल्पे कुमारीणां मौञ्जीबन्धनमिष्यते। अध्यापनं च वेदानां सावित्रीवचनं तथा" इत्यादौ स एवार्थो ग्राह्यो वेदेतिहासानुकूलत्वात्। "उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते" इत्याचार्यलक्षणम्। 'इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्' (अष्टा. ४।१।४६) इति पाणिनीयसूत्रानुसारमाचार्यानीशब्दः सिध्यति। आचार्यस्य स्त्री आचार्यानी पुंयोग इत्येव। आचार्या स्वयं व्याख्यात्री (सि०कौ० स्त्रीप्रत्ययप्रकरणे) कथं कस्याश्चिदपि महिलाया आचार्यात्वं स्वयमुपनयनं विना सम्भवति? "प्रावृतां यज्ञोपवीतिनीमभ्युदानयन् जपेत" इति गोभिलगृह्यसूत्रवचने यज्ञोपवीतिनीपदव्याख्या श्रीसत्यव्रतसामश्रमिभिः 'यज्ञोपवीतयुताम्' इत्येव कृता। महामहोपाध्यायश्रीशिवदत्तशर्मभिरपि तथैव प्रत्यपादीति दर्शितचरम्। अयमेवार्थो मुख्यो यज्ञोपवीतिनीपदस्येति न केनापि निराकर्तुं शक्यते। तस्माद् यज्ञोपवीतवद् धृतवस्त्रविशेषयुतामिति कैश्चिट्टीकाकारैः कृतोऽर्थो गौण एव यो न मुख्यार्थापलापने क्षमः।

"द्विविधाः स्त्रियः ब्रह्मवादिन्यः सद्योवध्वश्च। तत्र ब्रह्मवादिनीनामुपनयनम् अग्नीन्धनं वेदाध्ययनं स्वगृहे भिक्षाचर्येति। सद्योवधूनां तूपस्थिते विवाहकाले कथंचिदुपनयनं कृत्वा विवाहः कार्यः" इतिवाक्यद्वारा ब्रह्मवादिन्यो केवलं विरलापवादरूपेण ग्रहीतुं न शक्यन्ते। तथा च 'सद्योवधूनां तूपस्थिते विवाहकाले कथंचिदुपनयनं कृत्वा विवाहः कार्यः' इत्यत्र वर्तमानस्योपनयनपदस्य 'उप-नयनम्' अर्थात् 'पतिसमीपनयनं कृत्वा' इतिश्रीशास्त्रिमहोदयकृतोऽर्थः स्वर्णपदकार्हः। किं पतिसमीपे नयनेन विनापि कदाचिद् विवाहो भवति येनोपनयनपदद्वारा तद्वर्णनमावश्यकं भवेत्? एवंविधाननर्थान् कुर्वन्तोऽपि श्रीशास्त्रिमहोदया न सङ्कोचमावहन्तीति चित्रम्। "स्त्रिय उपनीता अनुपनीताश्च" इति गृह्यसूत्रवचनेऽपि द्विविधस्त्रीवर्णनं स्पष्टम्।

श्रीशास्त्रिमहोदयैः सनातनधर्मानुयायिमानिभिः प्रामाणिकत्वेनाभिमतेषु पुराणेष्वपि तादृशब्रह्मवादिनीनामनेकानि निदर्शनानि यथा,

तेभ्यो दधार कन्ये द्वे वयुनां धारिणीं स्वधा!
उभे ते ब्रह्मवादिन्यौ, ज्ञानविज्ञानपारगे। (स्कं० ४ अ० १)

तेभ्यः स्वधा सुते जज्ञे मैनां वैधारिणीं तथा।
ते उभे ब्रह्मवादिन्यौ योगिन्यौ चाप्युभे द्विज॥
विष्णुपुराणे (१।१०)

मार्कण्डेयपुराणे—

तेभ्यः स्वधा सुते जज्ञे मेनां वैधारिणीं तथा।
ते उभे ब्रह्मवादिन्यौ योगिन्यौ चाप्युभे द्विज॥ (अ० ५)

इत्थं चानेकप्रमाणैः 'ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्' इत्यत्र वेदाध्ययनरूप एव मुख्योऽर्थो न कथञ्चिदपि निराकर्तुं शक्यते शास्त्रिमहोदयैरन्यैर्वा सत्यप्रणयिभिः। पक्षपातग्रस्तानां हठधर्मिणां वान्या कथा। तच्च वेदाध्ययनं योग्यपतिवरणं वा द्वादशवर्षीयबालिकया शक्यते सम्यक् कर्तुमिति मूढोऽपि न कश्चिदभ्युपगन्तुमर्हति। "कन्यानां ब्रह्मचर्यम् ऋतुकालप्राप्तिपर्यन्तं तिष्ठति ततः प्रकृतिः

स्वयमेव तासां ब्रह्मचर्याद् यापनं कारयति" इति श्रीशास्त्रिणां लेखस्तेषां महिलाजातिविषयकान् हीनभावानेव सूचयति नान्यत् किञ्चित्। यद्ययं तेषां विश्वासः कथं ते बालविधवार्थमामरणं ब्रह्मचर्यमुपदिशन्ति ? महाभारतादिषु मरणपर्यन्तं ब्रह्मचर्यव्रतधारिणीनाम—नेकमहिलानां नामान्युपलभ्यन्ते यथा।

अत्रैव ब्राह्मणी सिद्धा, कौमारब्रह्मचारिणी।
बभूव श्रीमती राजन्! शाण्डिलस्य महात्मनः॥
सुता धृतव्रता साध्वी, नियता ब्रह्मचारिणी।
शल्यपर्वणि अ० ५४॥

भारद्वाजस्य दुहिता, रूपेणाप्रतिमा भुवि।
श्रुतावती नाम विभो! कुमारी ब्रह्मचारिणी॥
श० प० ४६।२

साहं तस्मिन् कुले जाता, भर्तर्यसति मद्विधे।
विनीता मोक्षधर्मेषु, चराम्येका मुनिव्रतम्॥
शा० प० ३२१।८३

सत्येवंविधे व्यतिकरे "कन्यानां ब्रह्मचर्यम् ऋतुकालप्राप्तिपर्यन्तं तिष्ठति ततः प्रकृतिः स्वयमेव तासां ब्रह्मचर्याद्यापनं कारयतीति" श्रीशास्त्रिणां कथनं कियन्महिलाजातिविषये तिरस्कारसूचकमिति विवेचका एव स्वयं निर्णेतुं शक्नुवन्ति। सर्वाभिर्महिलाभिरामरणं ब्रह्मचर्यव्रतं धारयितुं न शक्यते किन्तु षोडशवर्षपर्यन्तं ब्रह्मचर्यधारणं न कथमप्यशक्यम्। तादृशब्रह्मचर्याविध्यनन्तरमेव पतिवरणाधिकारः।

'ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्' इत्यादिवेदमन्त्रोदितभावमादायैव महर्षिगार्ग्यायणेन प्रणववादे (६।३) इत्थं प्रत्यपादि "पूर्णे हि प्रगल्भवीर्ये कामप्रेरणाया स्ववयोन्यूनामुद्वहेत्। ब्रह्मचारिणामुद्वाहस्तु ब्रह्मचारिणीभिः सह प्रशस्तो भवति। सति च द्वयोर्ब्रह्मज्ञाने न हर्षखेदौ नापि चानियतकाले विकारोत्पत्तिर्न रोगादिभवनम्। यादृशो यः स्वयं यत्प्रकृतिकः, यादृशनियमाचारवान्,

यादृशकर्मकारी तादृशीमेव कन्यां स्वयमेव विचार्य समुद्वहेत् ॥"
इत्यादि ।

श्रीशास्त्रिमहोदयाभिमतपुराणेष्वपि क्वचिद् विवाह्यकन्या-लक्षणानि वेदाद्यानुकूल्येनेत्थं दृश्यन्ते यानि तस्या यौवनमेव स्फुटं द्योतयन्ति । यथा भविष्यपुराणे (ब्रह्मपर्वणि १।५।२७-२९॥)
शतानीक उवाच,

"लक्षणं द्विजशार्दूल ! स्त्रीणां वद महामुने !
कीदृग्लक्षणसम्पन्ना कन्या स्यात्सुखदा नृप" ॥

सुमन्तुरुवाच—

हस्ति-हस्त-निभैर्वृत्तै रम्भाऽऽभैः करभोपमैः ।
प्राप्नुवन्त्यूरुभिः शश्वत्, स्त्रियः सुखमनङ्गजम् ॥
सन्ध्यावर्णसमं चारु, सूक्ष्मरोमान्वितं पृथु ।
जघनं शस्यते स्त्रीणां, रतिसौख्यकरं द्विज ॥
सुवृत्तम् उन्नतं पीनम्, अदूरोन्नतमायतम् ।
स्तनयुग्ममिदं शस्तम्, अतोऽन्यदसुखावहम् ॥
ईदृग्लक्षणसम्पन्नां, सु-कन्यामुद्वहेत्तु यः ।
ऋद्धिर्वृद्धिस्तथा कीर्तिस्तत्र तिष्ठति नित्यशः ॥
ब्रह्मपर्वणि १।५।११२

अष्टवर्षदेशीयानां ततोऽप्यल्पवयस्कानां बालिकानां विवाहं शास्त्रीयं मन्यमानाः श्रीशास्त्रिमहोदयाः किं कथयिष्यन्त्येवं-विधानां वैदिकाशयानुकूलानां श्लोकानां विषये ? श्रीशास्त्रिभिरुद्धृ-तानां कतिपयस्मृतिवचनानां तूद्धृतपूर्ववेदमन्त्रविरोधाच्च परस्पर-विरोधाच्च स्वतःसिद्धे प्रामाणिकेतरत्वे प्रमाणमूर्धन्यवेदप्रामाण्येन विषयोऽयं यथायथं प्रतिपादितोऽस्माभिरिति कृत्वाधुनायमुपसंह्रियते ।

———

## ❀ श्रुतिविज्ञानवैशद्यं वरीयः ❀

( लेखकः—पं० नत्थुरामः शास्त्री, पाठकः )

भो भो मननमानसहंसाः श्रीमन्तः पाठकपुङ्गवाः ! नास्ति यद्यपि गवामिव कामदुघानां निष्कामपदसमापादयित्रीणां वाचाञ्चार-यितुमवसरो यावत् सञ्चर एत्र न विद्यते, यतो हि प्रोक्तं केनचित् संसारोपाधिव्याधिबाधितान्तःकरणेन महात्मना,

बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः ।
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम् ॥

तथापि—

शास्त्रं विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय ।
खलस्य साधोर्विपरीतमेतद् दानाय मानाय च रक्षणाय ॥

इत्यादिसूक्तिसुधासेवनभावितात्मा को नाम नाघमर्षणं कुर्यात् ? सत्कर्म कुर्वतः संक्लेशोऽपि यशसे मतो मतिमतां सताम् । परञ्च नहि शास्त्रन्निगृह्यते प्रवचनेन, अपि तूपबृंह्यते स्वानुभूतिमात्रम्प्रकाश्यत इति निर्गलितोऽर्थः । इत्यलं भूमिकायवनिकानिपातेन । प्रकृतमनु-सरामः —

तत्र तावदादौ का देवता, को मन्त्रः, किन्तत्त्वम्, किं विधानम्, किं फलम्, कियत्कालसाध्यम्, कानि च तदुपकरणानि, इतिस्वमत्य-नुसारं यथासमयं विविच्यते । अस्ति तावल्लोके प्रवादः अयमास्तिको-ऽयन्नास्तिकः, । परन्न परमार्थतः कश्चिदास्तिको नास्तिको वा, किन्तु अनिर्वचनीयः । लोके स्वार्थवशात् कदाचिदास्तिकतां भजते कदाचिच्च नास्तिकतामापद्यते । स च स्वार्थो यदि सङ्कुचितः केवलं स्वकलेवरस-म्बन्धेन वर्तते तदा तु पापपुञ्जम् । यतो हि प्रोक्तम् केवलाघो भवति केवलादी । यदि तु स्वशब्देन आत्मा गृह्यते तस्य च सततं सर्वत्रातनेन सर्वव्यापिनः परमेष्ठिन उपसङ्ग्रहः क्रियते, तदर्थश्च यज्ञः स च निष्का-मभावेन शिष्टाचारपालनमिति स्वार्थः, तदासौ स्वार्थः सफलो भवेदि-त्याशास्महे ।

पूर्वं यथावद्वस्तुस्वरूपज्ञानाय प्रकाशस्यापेक्षा। स च प्रकाशो द्विविध आन्तरिको बाह्यश्च, आन्तरिको बुद्धिपदेन व्यपदिश्यते, बाह्यश्च सूर्यादिकः। किं नाम जगति स्यात् प्रकाशं विना सर्वमसदिव स्यात्, सदपि दुरुत्सन्नं स्यात्। तथा च यथा सूर्यादिकं विना न घटपटादिकमवभासते तथैव सात्त्विकबुद्धिं विना न सदसत्सम्प्रत्ययो भवति, न च संसारसरणं सुकरमिति महती प्रकाशापेक्षा। किञ्च यदि लोके कामना क्षुधादिरूपा न स्यात् किमर्थं संसरेत्सकलं प्राणिजातम्। यदि चान्नादिकं न स्यात्केन संसरणं स्यादिति परस्परभावनोपबृंहितं जगदिति श्रुतिर्ज्ञापयति 'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्' इति। अत्र प्रथमपदेनातीतत्वं न किन्तु मुख्यत्वमभिप्रेतमन्यथाऽनित्यत्वप्रसङ्गः स्यादिति।

स यज्ञः किम्प्रधान इति प्रश्ने 'अग्निमीले पुरोहितम्' इत्युत्तरवाक्यम्, यथा हि लोके पुरोहितो भवति कुलक्रमादागतः, प्रातश्च सूर्यः पुरोहितो बुभुक्षायामन्नं पुरोहितः, रात्रौ च निद्रा पुरोहितः, रथेऽश्वो युद्धे बाणाः, एवमेवास्य महतो जगद्यज्ञस्याग्निः पुरोहित इति न्यायेनैव ज्योतिश्चक्रमुपरिष्टात् प्रकाशते प्रकाशयति च सर्वं वस्तुजातम् इत्येकः पुरोहितत्वप्रकारो बाह्यः। आन्तरिकस्तु बुद्धिः पुरोहितः प्रकाशशीलत्वात् पुरस्तादेव भाविकार्यपद्धतिमनुमिमीते न तथा भाषितुम्प्रभवति तस्मादेव बादरायणेन प्रोक्तं 'धर्मस्य तत्त्वंनिहितं गुहायाम्'। अत एव च धीमन्तो महान्तः प्रकृत्या मितभाषिणो भवन्ति। यतो हि श्रूयते 'नानुध्यायाद्बहून् शब्दान् वाचो विग्लापनं हि तत्।' इति तस्याः पुरोहितत्वमविजानतामेवास्माकमद्य पराभवः, न तावदस्माभिरग्निश्चीयते न च चेतुं विज्ञायते केवलं व्यक्तित्वेन महत्त्वमभिलष्यतेऽनृतं वदद्भिरपि न ह्रीयते मोहादन्धमतीनां सञ्चितमपि ह्रियते भ्रियते च पारतन्त्र्यदुःखम् इत्यभिप्रायेणैव कठश्रुतिरुपतिष्ठते 'हतं राष्ट्रमपुरोहितम्' यस्मिन् राष्ट्रे सर्वे प्रधाना भवितुमभिलषन्ति तद् राष्ट्रं विनष्टं भवतीति। यावदस्माभिः पुरो-

हितत्वं न ज्ञायते न चोपास्यते सम्मन्यते च न स्वराज्यमाप्तुं प्रभूयते अपितु पराभवो ध्रुवोऽस्माकम्, प्राप्तमपि स्वराज्यं न रक्षितुं शक्यते भुज्यते वा अपितु विसवप्लुतं प्राणानपि द्रावयेदस्माकम् । यदास्माभिरग्निश्चितः स्यात् त्रिविधस्तदा स्वयमेव वयं स्वराजः स्यामेति नोदयति स्वयंभूर्वेदो यद् 'अग्निमीले' । स्यादत्र केषाञ्चिदैतिहासिकानाम्प्रवादो यद् 'एतन्मन्त्रकर्ता कश्चिदृषिः पारसीकदेशीय आसीत्तेन स्वमतप्रचाराय भारते संस्कृतेन मन्त्रा निबद्धाः' न मौलिकतामावहति । मन्ये तैर्वैदिकवाङ्मयेतिहासो नाधीत इति। अथ च ते पाश्चात्यानुमत्या विद्वत्त्वं द्रढयन्तः कृतार्थताम्मन्यन्ते ।

किंच श्रूयते स्वयंभूर्वेदो न पुरस्ताज्जातो नचावस्तात्, न च तेन तस्य तथात्वेऽपि किंचिद् हीयते अपितूपचीयत एव । दृश्यते च लोके दुग्धस्य पूर्वभावित्वेऽप्यल्पमूल्यवत्ता घृतस्य तु पश्चाज्जन्यत्वेऽपि बहुमूल्यम्। नहि सिंहः शरीरेण हस्तिना तुल्यः स्थूल अपितु पराक्रमेण तथैव यदि स्वयंभूरद्यापि कदाचित्स्वगत्योद्भवेत्तदा स सुतरां सम्मानमर्हेदिति कृत्वैवाग्निसूक्तं पश्चादुद् जातमपि पुरोहितम् यदि चोच्येतात्र स्वयंभूरनवधिः, कस्मादद्योदयो न दृश्यते तस्य ? तत्र प्रत्युच्यते नास्तीदानीं लोकस्य तपश्चर्याबुद्धिरिदानीन्तु केवलमाधिभौतिकावेशः । कामशान्त्या जीवनञ्चरितार्थं मन्यते न गण्यते परमार्थवार्तामात्रमपि । किन्तु 'यस्यार्थस्तस्य मित्राणि यस्यार्थस्तस्य बान्धवाः । यस्यार्थः स पुमाँल्लोके यस्यार्थः स च पण्डितः' ॥ 'एकस्य कर्म संवीक्ष्य करोत्यन्यो विगर्हितम्, गतानुगतिको लोको न लोकः पारमार्थिकः'॥ इत्यास्तां करुणाक्रन्दनेन । किन्तु यदि पाठकानां कश्चित्परितोषः स्यात्तदा संसूचितः पुनर्यतिष्ये किञ्चित्क्रमशोऽधिवक्तुमुक्तं-यतः 'आ परितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम् । बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः' ॥ इति शुभम् ॥

## —संस्कृत-गीतिका—

### पताका-प्रशस्तिगीतिः

ले० विद्याभास्करः, श्रीपरमानन्दः शर्मा व्याकरणशास्त्री साहित्याचार्यः

( १ )

जगति विजयतां सदा जयन्ती ।
त्रिविधपताका श्रियं श्रयन्ती ॥

सूर्यसोमसीमानमयन्ती पिशुनजनाननमानमयन्ती ।
निजनिजकर्मरतान् हरिहरिणान् विगतविरोधान् सङ्गमयन्ती ॥
जगति विजयतां सदा जयन्ती ।

एकच्छत्रं राज्यमिलायां जनितानन्दं सञ्जनयन्ती ।
मर्यादां नो दैवमहिम्ना यातां तां पुनरुन्नमयन्ती ॥
जगति विजयतां सदा जयन्ती ।

दर्शं दर्शं सुषमां स्वीयां रिपुगणमुखशोभां स्थगयन्ती ।
विश्वविचित्रा परमपवित्रा दर्शकचयनयनानि हरन्ती ॥
जगति विजयतां सदा जयन्ती ।

देशविदेशे जनितविशेषे लोकोत्तरमानन्तु वहन्ती ।
पराधीनतां मुदा हरन्ती स्वराज्यसुषमामुदाहरन्ती ॥
जगति विजयतां सदा जयन्ती ।

भारतमातुर्मस्तकशोभामुज्ज्वलयन्ती धाम दिशन्ती ।
उच्छृङ्खलतां प्रतर्जयन्ती स्वास्पदमुच्चैरुपार्जयन्ती ॥
जगति विजयतां सदा जयन्ती ।

### "शिशिरसमयासवः"

शान्तिरेव जननी जयलक्ष्म्याः शीतलं विजयते भुवि शीलम् ।
एति सूचयितुमेतदयं द्राग् ऊष्मकं नियमयन् शिशिरर्तुः ॥१॥
युक्तमेव तु तपस्तपस्ययोः सङ्कास्ति मधुमाधवं फलम् ।

उत्तरोत्तरवरं समागमं कोऽभिनन्दतु नरो न रोचनः ? ॥२॥
स्वागतं तनुमहे शिशिरस्य यस्य सोऽस्ति मधुरः परिणामः ।
किं स एति सुभगः ? सहसा यः पर्यवस्यति तथातिदुरन्तः ॥३॥
साधुशान्तप्रकृतिः कमनीयः सर्वशर्मसदनो रमणीयः ।
अद्वितीयसुषमो भुवि भर्तुः शोभनो विजयते शिशिरर्तुः ॥४॥
यद्यपीह कुसुमानि न तानि सन्ति सन्ति कुसुमा नि नतानि ।
वर्द्धते तदपि कालमहिम्ना हन्त ! हन्त ! कुसुमाशुग एषः ॥५॥
पद्मिनीषु सुमनःस्विरासु स्माभियाति मधुपोऽलघु धूर्तः ।
यो हि सोऽयमधुना मधुनाशाद् दीनदीन इव गच्छति भृङ्गीम् ॥६॥
इक्षुमिष्टरसमाप्य समानं चञ्चलालिरसमाप्य स मानम् ।
गन्तुमन्यफलिनं न समर्थः को नु वाऽवरमयेद् वरं त्यजन् ? ॥७॥
नम्रकम्रवदनोत्कलिकातो चन्द्रिकाच्छवसनेन वृताङ्गी ।
साभिसर्तुमयते रजनीयं मन्दमिन्दुदयितं दयितेव ॥८॥
कामुकोऽर्द्धनिशि कामयमानः कामिनीं कलति कामयमानः ।
चित्रमत्र प्रमदासमुदायः प्रेयसे यदयते समुदाय ॥९॥
कामनात ऋतुषु क्व नु कान्तं का मनागपि भजेत समाना ?
हन्त ! किन्तु कमनारतमेषा याचते न कमना रतवेषा ? ॥१०॥
तूलिका न, नहि कम्बलकं वा, धातवोऽलमथ नो न, हसन्ती ।
शीतमेषु दिवसेषु विलोप्तुं सा यथास्ति नवयौवनरम्या ॥११॥
लालनीयललनाललनीये रत्नभेव तरला फलिताङ्गे ।
सत्तुषारकदलीदललोला चन्द्रिका निशि चकास्ति नितान्तम् ॥१२॥
सौम्यया सुषमयाऽसमया तत् सम्पतद् हिममथानिललोलम् ।
भाग्यभाज इह ते कृतकृत्याः सत्कलत्रमिव सङ्कलयन्ते ॥१३॥
कम्पमानवसनोऽधिकतान्तः क्वाप्यसौ पिपतिषुश्श्लपादः ।
शीतपीतवदनश्च शयालुर्द्वारपाल इव घूर्णति चन्द्रः ॥१४॥
उन्नतो नवघनः स हिमानीमण्डितो रविकरैरधिसन्ध्यम् ।
कौतुकं कृतिषु किञ्चन कर्तुं किन्तु पारयति नो हिमशैलः ? ॥१५॥

# वायुयानाविष्कारेतिहासः।

सङ्कलयिता—श्रीदीनानाथः शर्म्मा शास्त्री सारस्वतः।
( स० ध० कालेजोपाध्यायः, मुलताननगरम् )

प्राचीनकाले वायुयानानां प्रचारोऽवश्यमासीत्। पुराणेषु वायुयानानां सम्बन्धेऽनेका :कथाः सन्ति। रामायणेऽपि वायुयानस्य वर्णनम्। रावणं हत्वा भगवान् रामचन्द्रो लङ्कातोऽयोध्यां पुष्पकविमानद्वारा प्राप्तः। किम् एतदादिकाः कथाः कल्पिताः सन्ति ? कदापि न। अविश्वासः कूपमण्डूकानां जीवनम्। यद्यद्यत्वे वायुयानानामाविष्कारो नाऽभविष्यत्; तर्हि अभिनवप्रवाहपतिता अद्यतना अविश्वस्ताः पौराणिकाविष्कारान्तरवद् अस्मिन्नपि आविष्कारे संशयाना अभविष्यन्।

न केवलं प्राच्यपुस्तकेषु वायुयानानां वर्णनमात्रम्; प्रत्युत सङ्क्षिप्तो निर्म्माणप्रकारोपि वर्णितः। तथा च श्रीभोजराजप्रणीते **समराङ्गणसूत्रधारे** यन्त्रविधानाध्याये प्रोक्तम् 'लघुदारुमयं महाविहङ्गं दृढसुश्लिष्टतनुं विधाय तस्य। उदरे रसयन्त्रमादधीत ज्वलनाधारमधोऽस्य चाग्निपूर्णम् ।३०।९७ तत्रारूढः पूरुषस्तस्य पक्षद्वन्द्वोच्चालप्रोज्झितेनाऽनिलेन। सुप्तस्यान्तः पारदस्यास्य शक्त्या चित्रं कुर्वन्नम्बरे याति दूरम्' ३०।९८ 'इत्थमेव सुरमन्दिरतुल्यं सञ्चलत्यलघु दारुविमानम्। आदधीत विधिना चतुरोऽन्तस्तस्य पारदभृतान् दृढकुम्भान्, ३०।९९ "अयःकपालाहितमन्दवह्निप्रतप्ततत्कुम्भभुवा गुणेन। व्योम्नो झटित्याभरणत्वमेति, सन्तप्तगर्जद्रसराजशक्त्या" ३०।१०० इत्यादि।

यदा मनुष्यः सांसारिकवार्त्तासु उन्नतिशिखरं प्राप्नोति, यदा स

इन्द्रियाणां सुखं भुक्त्वा भौतिकोन्नतितो विरज्यते, यदा तस्य सांसारिकपदार्थेषु सन्तोषस्य शान्तेर्वा आभासो न दृश्यते, तदा स आध्मात्मिकसुखमभि गच्छति। इयं वार्ता केवलं व्यक्तीनामेव कृते न, प्रत्युत समाजानां राष्ट्राणां चापि कृते सम्बध्यते। यदा एकं राष्ट्रं सांसारिकमार्गेभ्यो निर्विद्यते तदा तद् मानसिकोन्नतिमधिगच्छति। स समयो नास्ति दूरे, यदा अमेरिकाजर्मनीरूसप्रभृतयो देशाः सांसारिकसुखाद् असन्तुष्टा भूत्वा मानसिकसुखस्य अनुचिन्तनं विधास्यन्ति।

सारांशोऽयं यद्—योऽयं देश आध्यात्मिकोन्नतेरादर्शं संसारस्य समक्षं निदधाति; स कर्हिचद् भौतिकोन्नता अपि अवश्यं शिरोमणिरासामास इति। हिन्दूनां वेदान्तादिदर्शनशास्त्राण्यत्र उपोद्बलकानि यद्—हिन्दुजातिः सांसारिकसुखाद् निर्व्विद्यैव आत्मविद्यायामभिरुचिं पुपोष। पुनर्वायुयानादिकथानां सत्यतायामाशङ्कया न भाव्यम्।+

अनन्तकालाद् मनुष्यस्य इयमिच्छाऽभूद् यत् स पक्षिगणा इव आकाश उड्डीयताम, मत्स्यगणा इव च जले तरेत्। अनेककथासु उड्डयितृयन्त्रस्य (उडनखटोला) वर्णनमायाति। कस्याञ्चित् कथायां मनुष्यैः पक्षौ योजयित्वा उड्डयनपरिश्रमः कृतः। पञ्चतन्त्रे कौलिकस्य कृत्रिम-दारुमयगरुडकथा कस्माद् निह्नुता। विज्ञानोन्नत्या सहैव आसां कथानामाधारेण आकाशक्रीडापि कार्य्यरूपे क्रमशः पर्य्यणमत्।

उत्सवादिषु ग्रामीणाः कर्गजानां दीपकान् (गुबारा) निर्म्मान्ति, ज्वलद्दीपकं तत्र निधाय तान् उड्डाययन्ति। दीर्घदीपकज्वलनात् तदीयवायुरुष्णो भवति। उष्णवायुः शीतलवायोरपेक्षया लघुर्भवति। अयं × लघुवायुरमुं कर्गजप्रदीपमुपरि उड्डाययति। इत्थं तद् वृहत्कर्गजनिर्म्मितविमानं रात्रौ आकाश उड्डीयते। तैले समाप्ते कारणा-

+आशङ्कया न भाव्यम्, भावे कृत्यप्रत्ययः। ×वायुः पुंसि।

न्तरेण वा तद् विमानम् अल्पकालोत्तरं पृथिव्यां स्खलति। जातु तानि यानानि आकाशे अत्यन्तरोच्चतायाम् उड्डीयन्ते, सप्ताष्टक्रोशाच्च दूरे पतन्ति।

आकाशे रमणस्य प्रथमं साधनमेतदासीत्। 'गुब्बारा' नाम्ना ख्यातेषु उष्णवायुं सम्भृत्य मनुष्या आकाश उड्डिडियरे। परन्तु वायोः शैत्ये तैरवातीर्य्यत+। एषां द्वारा आकाशीया अनेकवार्त्ता ज्ञाताः। अनेकैर्धीरपुरुषैरस्मिन् कार्य्ये प्राणानामाहुतिर्दत्ता। परन्तु अनेन मानवसमाजस्य उत्साहो न्यूनतां न गतः। 'गुब्बारा' नामकस्य गतिर्वायुगतौ निर्भरा आसीद्। यां दिशं प्रति वायुः 'गुब्बारा'

(१७ पृ० द्र०)

---

## सैनिकं शिक्षणम्।

(ले०—श्रीप्यारेलालः शर्मा शास्त्री, एम० ए० एम० ओ० एल्०)

मदीयपार्श्वे गुलिकाप्रक्षेपिणी यदि सन्निहिताऽपि भवेत्, अहं चालयितुं न शक्नोमि। पुस्तकानि कतिपयानि पठितानि, परमात्मरक्षार्थं कस्यापि शस्त्रस्यास्त्रस्य वा चालनं नाभ्यस्तम्। यदि शत्रवो मम देशम् आक्रमेयुः कथमहं देशं प्रति स्वकीयं कर्त्तव्यं पालयेयम्?

ब्रिटिशशासकैरस्मिन् विषयेऽस्माकं महानपकारः कृतः। सैनिकशिक्षणाद् वयं वञ्चिताः। सेनाविभागस्य सर्वाण्युच्चपदानि वैदेशिकानां पार्श्वे सन्ति। भारतीयेषु विश्वास एव न क्रियते। स्वार्थपरता ह्यत्र कारणम्। तैश्चिन्तितम् यदि भारतीयेभ्यः सेनायामुच्चाधिकाराः प्रदत्तास्तर्हि कदाचित् कुशलीभूता इमेऽस्माकमेव विनाशकारणं न स्युरिति। सर्वदेममेव स्वार्थमग्रे दधमानैस्तैः शनैः शनैर् भारतीयानां हृदयेभ्यो युद्धे शौर्यप्रदर्शनात्मक उल्लास एव विनाशितः। अद्य पञ्चाशदधिकवर्षशतं गतं वैदेशिकानां भारते शासनं

कुर्वताम्, परमस्मिन् महति कालेऽपि तैर्भारतीया भूमौ, समुद्रे, अन्तरिक्षे च स्वावलम्बिनो न कृताः । नासीदिदं कठिनतरं कार्यं तेषां कृते । राजपूत-मराठा-सिक्ख-पठानादिभिः प्रकृत्या युद्धप्रियाभिर्जातिभिरध्यासिते भारत आधुनिकयुद्धकलायाः प्रसारोऽतिसुगम आसीत्, भारतीयैः सङ्घटिता सेना न केवलं भारतभूमिमेवारक्षिष्यद् अपि तु समागतायां विपदि-यथेदानीं समागताऽस्ति-ब्रिटिशानामपि साहाय्यमकरिष्यत् । इदानीं विश्वविद्यालयानां विद्यार्थिभ्यो यत् सैनिकं शिक्षणं (University training corps)—तदप्यनिवार्यरूपेण न प्रदीयते, तस्यादौ स्वीकरणेऽपि सेनाविभागेन यथाशक्ति कतिविधाः प्रतिबन्धाः समुपस्थापिता आसन् । वर्तमानयुद्धस्य गतसितम्बरमासि प्रारम्भो बभूव । यदि तस्मात् समयादपि युद्धविषयकं शिक्षणं भारते प्रारप्स्यत अद्यावधि महत्युन्नतिरभविष्यत् । ब्रिटिशैः स्वकीयदेशे तु तस्माद्दिनादेवास्यां दिशि प्रबन्धः कृतः ।

अस्मदीयाः केचिन्नेतारः कथयन्ति यद् भारतस्य कृते बाह्याक्रमणस्य किमपि भयं न विद्यते । अस्माकमभिप्रायः पण्डितजवाहरलालनेहरूमहोदयस्य लवपुरे ब्रेडलाभवने मईमासस्य २५ तारिकायां प्रदत्तेन व्याख्यानेनास्ति । कथं भयं न विद्यते ? निरस्त्रं निर्बलं च पुरुषं सर्वोपि जनोऽधिरोढुमीहते । भारतस्य पार्श्वेऽस्त्येव किं बलं—किं भूमौ सेनाबलमस्ति, उत अन्तरिक्षे समुद्रे वा ? यस्माच् शत्रवो भेष्यन्ति ? यदि भूमण्डलस्य शक्तिशालीन्यपि राष्ट्राणीदानीं शत्रोराक्रमणात् स्वानि निर्भयानि न मन्यन्ते—सर्वप्रकारेण सैन्यबलं वर्धयन्ति—तर्हि कथं प्रारम्भत एव निर्बलं भारतं भयस्याऽऽशङ्कया रहितं भवेत् ? अमेरिकाराज्येन, एष्वेव दिवसेषु युद्धसामग्र्याः क्रयणार्थं कतिपयार्बुदरूप्यकाणि स्वीकृतानि ।

तस्मिन्नेव भाषणे पण्डितमहोदयैर् यदि कश्चिद् नवीन आक्रमणकारी समागमिष्यति वयमात्मसमर्पणापेक्षया मरिष्याम इत्यादिवचनैर्भयस्याऽऽशङ्काऽपि प्रदर्शिता । तस्यैव मासस्य २८ तारिकायाम् एवटाबादनगरे भाषमाणैस्तैरियमेवाऽऽशङ्का 'यदि हिटलरो भारतभूमि-

माक्रमिष्यति, वयमामरणं योत्स्यामहे' इति वचोभिः स्फुटीकृता। कथं वयं योत्स्यामहे यदि वयमाधुनिकयुद्धकलातः परिचिता एव न स्मः? शस्त्रास्त्रशून्यानामस्माकं मूकप्राणिनामिव मरणेनापि देशस्य किमुपकृतं भविष्यति? केवलं शत्रोरभीष्टसिद्धिरेव।

कांग्रेस-सभा सैनिकशिक्षणविषये न तथा प्रयतत औत्सुक्यं वा दर्शयति—यथा सा ब्रिटिशराज्यादिदं वचनं गृहीतुमिच्छति यद् युद्धात् सद्योऽनन्तरमेव भारतवर्षं वैधानिकं स्वातन्त्र्यं प्राप्नुयात्। अस्य कारणं महात्मगान्धिनोऽहिंसायां विश्वासोऽस्ति। स कथयति स्वाधीनमहिंसात्मकञ्च भारतं सेनां नैवापेक्षिष्यते, यतो हि तस्य शत्रव एव न भविष्यन्ति, चेच् शत्रवो भविष्यन्त्यपि भारतं केवलमहिंसाबलेनैव तैः सह योत्स्यत इति। परमस्मिन् मते महात्मा प्राय एकाक्येवास्ति। तस्य दृढानुयायिनोऽपि तेन सहैवं न विश्वसन्ति। अहिंसाया नीतिः सर्वत्र सर्वास्ववस्थासु च सफलीभवितुं नार्हा। अहिंसायाः शस्त्रं तस्य शत्रोरेव विरुद्धम् उपयोक्तुं शक्यं यस्य हृदि लोकमताय आदरो भवेत्, अथ च यः सहनशीलो भवेत्। अस्मिन् विषये हिटलरेण सहाऽऽङ्गलानां तुलना न संभवति। आङ्गला हिटलरापेक्षया निस्संशयमेव प्रशस्याः।

किञ्च स्वयं कांग्रेसमन्त्रिमण्डलेन स्वकीयस्वकीयप्रान्तेषु शान्तिस्थापनार्थं हिंसाबलस्य प्रयोगः कृतः। यदि स्वकीयदेश एव दुश्चरितानां ताडनाय हिंसाबलप्रयोगस्याऽऽवश्यकताऽस्ति, तर्हि वैदेशिकाक्रमणकारिषु तस्योपेक्षा कथं शक्या?

अतोऽस्माभिस्तानि सर्वाणि युद्धवस्तूनि सज्जीकर्तव्यानि यान्यस्मिन् समये सर्वजगतः शत्रोर्हिटलरस्य—यः स्त्रीष्वपि न दयते, बालानपि न मुञ्चति, वृद्धानप्यग्निसात्कुरुते, क्षतविक्षतानपि भीषणाग्निपिण्डैर्दहति—अथवा अन्यस्य वा कस्यचित्तस्य भ्रातुः पार्श्वे सन्ति। भारतेऽपि जापानदेशवद् वयस्केषु सैनिकशिक्षायाः प्रसारोऽनिवार्यरूपेण कर्तव्यः। तदैव वयं देशं प्रति स्वकीयं कर्तव्यं पालयिष्यामः।

मृतैः संप्राप्यते स्वर्गो जीवद्भिः कीर्तिरुत्तमा।
तदुभावपि शूराणां गुणावेतौ सुदुर्लभौ ॥

---

( १४ पृष्ठतोऽग्रे )

स्थविमानं नयति स्म तां दिशं प्रति वैवश्येन तेन उड्डीयते स्म। भयावसरे जना दृढातपत्रं तेनुः; विमानं च त्यक्त्वा शनैः शनैरधस्ताद् अवतरन्ति स्म।

'गुब्बारा' यानस्य वायोरुष्णत्वस्थितिः सरला नासीत्। ततो 'हाइड्रोजिन'स्य आविष्कारेण लघुवायुप्रश्नोऽपि सिद्धो जातः। 'हाइड्रोजिन'वायुः साधारणवायोरपेक्षया अतिलघुर्भवति। अत एव उष्णवायुस्थाने 'हाइड्रोजिन'वायुः प्रायुज्यत। 'गुब्बारा' यानस्य अवरोहणसमये 'हाइड्रोजिन'वायुः शनैः शनैर्न्यूनः क्रियते स्म। इत्थं यानं शनैश्शनैः पुनर्भूमिमवतरति स्म। विचार्य्यतां क्षणं यद् आकाशे उड्डयनं, छत्त्रञ्च धारयित्वा अथवा 'हाइड्रोजिनं' निष्कास्य शनैश्शनैः पृथिव्यामवतरणं कियतः साहसस्य कार्य्यम्?

जर्मनीप्रदेशस्य 'ज़ेप्लीन' वैज्ञानिकेन ईदृशानि 'गुब्बारा' यानानि दृष्ट्वा हाइड्रोजिनवायोर्महान्ति वायुयानानि निर्म्मितानि। ज़ेप्लीनेन स्वप्रयोगशालायामनेकशो वायुयानानि निर्म्मितानि, प्रत्येकवारं च तानि सुधारितानि। विगतयूरोपीयमहायुद्धे जर्मनीप्रदेशस्य ज़ेप्लीनवायुयानैः स्वशत्रूणां नगरेषु गुडकगोलकाः प्रक्षिप्ताः। एषु पञ्चविंशतिमनुष्याः स्थातुमशक्नुवन्। एतानि केवलं रात्रावेव *उड्डाय्यन्ते स्म। जर्मनीसम्राड् आकाशयुद्धे असाफल्यमशिश्रियत्; तत्र कारणं यद् ज़ेप्लीनवायुयानेषु बह्वयस्त्रुटय आसामासुः। हाइड्रोजिनवायुर्दहनशीलो भवति। अतस्तेषां वायुयानानां नाशनमतीव

---

*णिजन्तस्य कर्मणि।

सुगममासीत्। एतेषां नाशाय एको 'बम'गोलकः पर्य्याप्त आसीत्। एतैरेव कारणैर्जर्मनीसम्राजोऽस्मिन् कार्य्ये महती क्षतिरभूत्।

अमेरिकायां 'हाइड्रोजिन'वायोः स्थाने 'हीलियम' वायोः प्रयोगोऽक्रियत। 'हीलियम'वायुर्दग्धुं न शक्यते, परन्तु बहुमूल्यताकारणात् तदीयप्रयोगोऽसम्भवी जातः। यावद् 'हीलियम' निर्म्माणस्य कोपि समर्थ उपायो न निर्म्मीयेत; तावत् तेन लाभो दुष्करः।

'जर्मनी'प्रदेशस्य 'ज़ेप्लीन'वायुयानैः फ्रांसइङ्गलैण्डयोरातङ्को जातः। रात्रौ बालस्त्रीपुरुषा बिभ्यति* स्म। अस्मिन् समये तानि वायुयानान्यपि प्रचलितानि अविद्यन्त, यानि वायुसम्भृतानि भवन्ति स्म, 'इञ्जिन' द्वारा च चाल्यन्ते स्म। एषामेव वायुयानानां गुडक ( बारूद ) प्रक्षेपेण 'ज़ेप्लीन' वायुयानानां क्षतिर्जाता, येन 'जर्म्मनी' राज्येन आकाशयुद्धं संरुद्धम्। 'इञ्जिन'धारिणां वायुयानानामाविष्कारोऽमेरिकानिवासिभ्यां 'राइट'नामकसहोदराभ्यां कृतः। वायुसम्भृतभारवद्यन्त्रद्वारा उड्डयनम् अथ च यन्त्रस्य अग्रतः पृष्ठत उच्चैर्नीचैश्च स्वैरं नयनमपि सुगमं कार्य्यं नाऽऽसीत्।

सर्वस्मात् प्राग् वैज्ञानिकेन 'लेंग्ली'नामकेन 'स्टीम-इञ्जिनं' योजयित्वा स्वयन्त्रं चालयितुमुपक्रान्तम्। परन्तु दुर्भाग्यवशात् तन्मृत्युरभवत्; तद्ध्येयं च पूर्णं न जातम्। परन्तु प्रसिद्धं यत् तदीयं वायुयानं वायौ उड्डीयमानं दृष्टमासीत्। एतद् अपूर्णकार्य्यम् 'आरविलराइट-विलवरराइट' नामकाभ्यां भ्रातृभ्यां सम्पूरितम्। उभयोर्जन्म एकस्य अध्यापकस्य गृहे समजनि। तदीया माताऽपि शिक्षिता योग्या चाऽऽसीत्। सर्वः परिवारश्चतुरो बुद्धिमान् शिक्षितश्चासीत्।

उभौ भ्रातरौ रथकार(मिस्त्री)कार्य्यमकुरुताम्। भग्नानि च वायुयानशकलानि निर्म्मातःस्म। अस्मात् कार्य्याद् यः समयोऽवशिष्यते स्म; तं तौ वायुप्रयोगेऽनयताम्। प्रथमं ताभ्यां लघुवायुयन्त्राणि

*बहुवचने।

निर्म्मितानि, लघुलघूनि च 'इञ्जनानि' संयोज्य तौ तानि उड्डायितवन्तौ। ताभ्यामेकं पक्षवद्यन्त्रं निर्म्मितम्। यन्त्रं स्वपक्षौ पक्षिवत् प्रसारयति सङ्कोचयति च स्म। वायोस्तीव्रगतिवशाद् यन्त्रस्य पक्षौ स्वयं प्रसृतौ अभवताम्, मन्दगतिवशाच्च संकुचितौ अभवताम्। यन्त्रस्य साम्यावस्थायै विशिष्टः प्रबन्धः कृतः।

प्रथममुभाभ्यां भ्रातृभ्यां स्वयन्त्रं 'पतङ्ग'वद् रज्जुं बद्ध्वा चालितम्, पुनस्त्वरया पृथिव्यां +भ्रमयित्वा उड्डायितम्। यन्त्रस्य अधस्ताद् उभाभ्यामीदृशचक्राणि निर्म्मितानि यत् तद् यन्त्रमधोऽवतरणे सहसा न तिष्ठति स्म, प्रत्युत शनैः शनैर्भ्रमित्वैव तिष्ठति स्म।

प्राथमिकोड्डयने यन्त्रमेककलापर्य्यन्तमुड्डीनम्; परमुभौ एतेन न समतुष्यताम्; तौ वायुप्रयोगे निरतौ स्थितौ। अन्ते तौ साफल्यमलभेताम्। अद्यतनसमयात् त्रिंशत्पञ्चत्रिंश*वर्षपूर्व्वमुभाभ्यां भ्रातृभ्यां वायुसम्भृतयन्त्रद्वारा 'मील'त्रयस्य उड्डयनं कृतम्। जनता इमां वार्त्तां न वेत्ति स्म। 'मील'त्रयोड्डयनस्य वर्षचतुष्कोत्तरम् आभ्यां घोषणा कृता यद्--आवाभ्यां प्रतिहोरं ३८ मीलानामुड्डयनशक्तिक्रमेण २४ मीलपर्य्यन्तम् आकाशयात्रा ससाफल्यं कृता। अनेन समाचारेण जनतायां कोलाहलः समजनि। बहवः पुरुषा अत्र विश्वासं न दधुः। उभाभ्यां भ्रातृभ्यां नृपद्वारा एतादृशयन्त्रनिर्म्माणस्य एकाधिकारः प्राप्तः। एतदधिकारप्राप्त्या जनतायाः समक्षमेको भ्राता प्रथमवारम् ८ मीलपर्य्यन्तमाकाशे उदडयिष्ट। द्वितीयवर्षे पुनर्जनतासमक्षं वायुयानेन आकाशे भ्रमणं कृतम्। अस्मिन्नवसरे तद् यन्त्रमेकहोरापर्य्यन्तमाकाशे उड्डीनम्। एकहोरोत्तरं तद् वायुयानं पृथिव्यां सकुशलं प्राप्तम्। संसारेण उभयोर्भ्रात्रोर्महान्† सम्मानः कृतः। यदा तौ जर्मनीप्रदेशे भ्रमणपरौ

+ मित्त्वाद् ह्रस्वः। *अत्र डच् प्रत्ययः। इमानि वर्षाणि इतिहास- लेखकेन तत्समये लिखितान्यासन्; इदानीं तु एतदाविष्कारे ८०-१०० वर्षाणि जातानि स्युः। †सम्मानः पुंसि घञ्प्रत्ययान्तत्वात्।

आस्ताम्, जेप्लीननाम्ना सह तयोः साक्षात्कारो जातः। तेन तौ यथेष्टं सत्कृतौ। शीघ्रमेव समस्तैर्देशैर्वायुयाननिर्म्माणमारब्धम्। विगतयूरोपीयमहायुद्धे अस्यां कलायां विशिष्टोन्नतिरभवत्। एषां वायुयानानां द्वारा शत्रुसेनानां छायाचित्राणि अगृह्यन्त, शत्रूणां 'जेप्लीनेषु' च 'बम'वर्षणमक्रियत × ।

वायुयानविद्याया भविष्यत्काल उज्ज्वलः। जलयानैर्बाष्पयानैश्च यानि कार्य्याणि दिनैर्भवन्ति स्म अधुना तानि वायुयानद्वारा होराभिर्भवन्ति। शीघ्रमेव देशेषु वायुयान*विश्रमस्थानानि (स्टेशन) निर्म्मास्यन्ते, जनता च आकाशयात्रां प्रारप्स्यते। द्राग्ग(डाक)-कार्यं तु वायुयानैरधुना आदीयते। शीघ्रमेव अज्ञातस्थानानां सम्बन्धे संसारोऽभिज्ञो भविष्यति।

असन्दिग्धमेतद् यद्--वायुयानैर्महाँल्लाभो जातः परन्तु युद्ध-विज्ञानाविष्कारान् निशम्य हृदयं वेपते। सर्व्वे देशा युद्धाय सज्जी-भवन्ति। नूतननूतनानि भीषणशस्त्राणि निर्म्मीयन्ते। आगामिमहा-युद्धानि† आकाशे जले च स्युः। आकाशाद् ईदृशो विस्फोटकः पातयिष्यते, येन बहून् क्रोशान् विषाक्तवायुप्रसृत्या मनुष्या जीवान्त-राणि च अन्तमेष्यन्ति। अनया आपत्त्या भयङ्करस्थितय उपस्था-स्यन्ते। इत्थं विज्ञानोन्नतिर्मनुष्यसमाजस्य नाशसाधनं भवन्ती वर्त्तते।

अद्यापि वायुयानानि तीव्रं शब्दायमानानि गच्छन्ति। भविष्यति शान्तवायुयानानि उड्डयिष्यन्ते। रात्रौ च तदुपस्थितिरज्ञाता भविष्यति। अद्यत्वे शब्दस्य कारणं तेषु 'पैट्रोल'स्य उपयोगः; परमग्रे तत्र 'तरलवायु' प्रयोगः स्याद् येन शब्दो न स्यात्। तस्मिन् समये आकाशयुद्धमन्यदपि भीषणत्वं गाहिष्यते।

---

*विश्रमः। अत्र 'नोदात्तोपदेशस्य' (पा७।३।३४) इति वृद्धि-निषेधः। विश्राम इति तु अपाणिनीयम्। †'अगामि-' इति समासे, अत एवाऽत्र न दीर्घप्राप्तिः।

स समयोऽपि नास्ति दूरे, यदा एकमेव यन्त्रमाकाशाद् अवतीर्य्य पृथिव्यां मरुत्तरवद् (मोटर) धाविष्यति, पृथिव्यां च धावमानं जले तरिष्यति तत्र मत्स्यवद् जले निमज्ज्य निह्नुतं भविष्यति। पुनः स्थानान्तरे ततो निष्क्रम्य उद्गत्य च आकाशे उड्डयिष्यते। इदं कार्य्यं वैज्ञानिकानां शक्तितो न बहिर्भूतम्।

एवं विज्ञानबहुलेऽपि काले प्राचीनकालवद् उन्नतिरद्यापि न जाता। पुष्पकविमानं वैज्ञानिकपरमोत्कर्षस्य उदाहरणमासीत्। तस्मिन् सर्व्वाः सेना निविष्टा इत्येका विशिष्टता। अन्या विशिष्टता तु इयं यत्--तत् 'तिष्ठ, चल, अधो याहि, उड्डीयस्व' इत्यादिना कथनमात्रेणैव तत्तत्कार्य्यं करोति स्म विनैव इञ्जनप्रयोगम्। अद्यत्वेऽपि विदेशेषु एकं यन्त्रं निर्म्मितं श्रूयते यद् Go (चल। इति शब्दकथनेन चलति Stop तिष्ठ) इति शब्दकथनेन च तिष्ठति। एतच्छब्दमात्र-तरङ्गास्तस्मिन् महान्तं प्रभावं पातयन्ति। अद्यत्वेऽस्मदीयदैशिकयूना हंसराजवायरलैसेनाऽपि एक ईदृशो मरुत्तरः (motor) आविष्कृतः श्रूयते, यो विनैव 'पैट्रोल' व्ययं सूर्य्यकिरणैरेव संचलति। तत्र एकं यन्त्रं वर्त्तते यत्र सूर्य्यकिरणाः संचीयन्ते; तद्बलाद् रात्रावपि स मरुत्तरश्चलति। एवं जापानदेशेन एक ईदृशो मरुत्तर आविष्कृतो यः केवलं 'चाबी' प्रभावेणैव चलति। एवमन्ये अपि आविष्कारा भवन्तो वर्तन्ते, यथा च 'रेडियो'प्रभृतयः। अधुना श्रूयते यद् 'रेडियो' यन्त्रे वक्तुश्चित्रमपि प्राप्स्यते। एवं यदा विज्ञानोन्नतिर्भविष्यति तदाऽद्यतनानामविश्वस्तजनानां पौराणिकाऽऽविष्कारेषु योऽविश्वासो वर्त्ततेऽद्यत्वेऽपि, सोपि विलीयेत, येन तेषां शिरोऽवनतं स्यात्। अस्तु,

एवं विज्ञानोन्नत्या भविष्यति मनुष्या अपि पक्षिवद् उड्डयिष्यन्ते। वैज्ञानिका ईदृशान् पक्षान् योजयिष्यन्ति, ये मनुष्यान् आकाशे सुरक्षितान् नेष्यन्ति। तदाऽस्यां विद्यायां नवयुगं भविता। तादृश-पौराणिकेतिहासेषु सन्दिहानानां जनानां स्वकीयप्राचीनजन-निन्दनप्रकृतौ स्वयमेव पश्चात्तापः स्यात्।

---

# "ब्रह्मचर्यम्"

( ले०—पं० विपिनचन्द्रबन्धुः शास्त्री,साहित्याचार्यः, प्रभाकरः । )

यदि वयमिह सूक्ष्मेक्षिकया प्रेक्षामहे तदैतत् सुव्यक्तं प्रतीयते यदार्याणामस्माकं जीवनं न केवलं जन्मनैवोपक्रम्यते अपि तु गुरुभिरुपनीयमाना वयं जनिमारभामहे ।

उप=ब्रह्मणः समीपे वेदश्रवणमनननिदिध्यासनादिप्रक्रियया, नयनम्=गुरुद्वारा शिष्यस्य प्रापणं यस्मिन् संस्कारविशेषे तदुपनयनम्। संस्कारोऽयं न केवलं परां विद्यामधिगन्तुमपि तु विश्वस्य वास्तवं स्वरूपं परिचेतुम्, निजं जीवनलक्ष्यमवगन्तुम्, भविष्यत्प्रातिकूल्यमनुकूलयितुञ्च क्रियते।

साम्प्रतं विचारोऽय नासाम्प्रतं यदलभ्यलोकद्वयश्रेयस्सम्पादकस्यास्योपनयनसंस्कारपादपस्य मूलसेचनकं सलिलङ्किम्? ब्रह्मचर्यमित्युत्तरम्।

इमं वै विषयमनुसृत्य किंचित् प्रस्तोतुमुपक्रमामहे ।

एतस्यैव खलु ब्रह्मचर्यस्य साधकेभ्यो ब्रह्मचारिभ्यो गुरुभिरावश्यकी कार्यद्वयी निर्धारिता, विद्याया अध्ययनं व्रतस्य पालनञ्चेति। विद्याया अध्ययनेन धीरस्माकं विकासमधिगच्छति, व्रतस्य पालनेन मनश्च नो वशीभवति । मनसि निजायत्ते सति सांसारिकजीवनस्य बीजभूतमस्माकं वपुर्दृढं बलवच्च जायते । वपुषो दार्ढ्यमनवद्यं स्वास्थ्यञ्चैवाचारनिर्मितौ हेतुः । सदाचारेणैव जीवने पवित्रा भावाः समाविशन्ति । सदाचारो नूनं ब्रह्मचर्यसम्भवः । ब्रह्मचर्यव्रतस्य पालनमेव ब्रह्मचारिणो मुख्यमुद्देश्यम् ।

दुरितमात्रविपाकिनि कलौ तत्राप्यर्थकामप्रधाने वर्त्तमानेऽनेहसि एतत्सम्भाव्यते यद् वैदेशिकशासकानाञ्चित्रैरुत्पीडनैरुत्पीडितमानसो मानवः कश्चनागत्य पृच्छेत् "किन्नाम ब्रह्मचर्यम्" इति ? तदर्थमेवात्रोच्यते-"ब्रह्मचर्यं हि नाम सर्वथा वीर्यरक्षणम्" इति । वीर्यं रक्षितुमष्टविधमैथुननिषेधोऽस्माकं मुनिनिर्मितैर्धर्मशास्त्रैः प्रतिपादितः ।

तानि च मैथुनानि यथा—"स्मरणं कीर्तनं केलिः, प्रेक्षणं गुह्यभाषणम्। संकल्पोऽध्यवसायश्च, क्रियानिर्वृत्तिरेव च ॥" इति। नृदेहः खलु रसरुधिरमांसमेदोऽस्थिमज्जाशुक्रेति सप्तधातूनां योगेन निर्मितो विधिना, अदो धातुसप्तकमेव शरीरस्य महदुपकरणम्। एतेषामेव धातूनामपक्षयो नूनं रुजो बीजम्, उपचयश्च पुष्टिमूलम्। रात्रिन्दिवं क्रियमाणेन परिश्रमेण धातूनां क्षतिर्जायते, अशन-विश्रान्तिभ्यां पुनरेषाम्पूर्तिर्नियता। रसादिधातुः प्रत्येकं स्थूलः, सूक्ष्मो मलश्चेत्येवं त्रिधा विभक्तः। अभिहितमप्यत्र श्रीमता सुश्रुतमहर्षिणा—

"स्थूलः सूक्ष्मस्तन्मलश्च तत्र तत्र त्रिधा रसः" इति रसादिभिः सप्तधातुभिरुत्तरोत्तरं वीर्यस्योत्पत्तिः। वीर्यं हि मानवशरीरस्य महान्निधिः। यैः पुनरिष्यते निजं शं तैर्वीर्यरक्षणमपेक्षितम्। ब्रह्मचर्य-व्रतं परिपालयन्तो ये केचित् स्त्रीषु संयता भवन्ति तेषामेव शरीरं सुन्दरं बलशालि च भवितुमलम्। आह च भगवान् सुश्रुतो यथा—"आयुष्मन्तो मन्दज्वरा वपुर्वर्णबलान्विताः। स्थिरोपचि-तमांसाश्च भवन्ति स्त्रीषु संयताः" इति। महर्षिः पतञ्जलि-रपीदमेव वचः पोषयति "ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः" इति। आगतमेव विद्यार्थिनं गुरुकुले गुरुरित्थमुपदिशति प्रारम्भे, यथा च गोभिलमहर्षिणोक्तम्—

"ब्रह्मचारिन्? क्रोधानृते वर्जय, मैथुनम्, कौशीलवगन्धाञ्जनानि, स्नानं जलक्रीडापूर्वकं वर्जय, मधुमांसे स्वयमिन्द्रियमोचनमिति" वस्तुतोऽप्यवलोकयामो यत् क्रोधानृते अमङ्गलमूले। स्त्रीणां संगत्याऽनयोरुद्भवः। स्त्रीणां सान्निध्येन कथमपि वीर्यस्य क्षरणमनि-वार्यम्, क्षरिते वीर्ये शरीरमपि दौर्बल्यं भजते। मतिर्मेधा च विस्मृति-मधिगच्छतः। योषितां सहवासः शिक्षाप्राप्तौ घातकः, अध्ययना-वस्थायां त्वेष सर्वथा परित्याज्यः। भगवता मनुनापि विहितं यद् "अवकीर्णी भवेद् गत्वा ब्रह्मचारी तु योषिताम्" इति। ब्रह्मचारि-णैतच्चेष्टितव्यं सर्वदा "यन्मे वीर्यं न जातुचिदपि स्थानभ्रष्टं भवेत्"

इति । यतो ह्यनष्टवीर्यस्य जनस्य नास्ति जगति किमपि दुर्लभं वस्तु, शास्त्रैरपि प्रपञ्चितं करोहत्य निरीक्षणीयं तत्र, तथाहि ।

न तपस्तप इत्याहुर्ब्रह्मचर्यं महत्तपः ।
ऊर्ध्वरेता भवेद्यस्तु स देवो न तु मानुषः ॥

इति । ब्रह्मचर्ये कियती महती शक्तिर्वर्वर्ति, पश्यन्तु भवन्तः, भूपतिरेको ब्रह्मचर्यतपसा प्राज्यं राज्यमनुशास्ति । चेदसौ नृपो ब्रह्मचर्यहीनो भवेत्, यदि च तस्य चेतः कस्याश्चिन्नायिकाया विरहानलेन प्रदीप्तं तर्हि अचिरादेव तस्य प्राज्यमपि राज्यं भस्मसाद् भवतीति नियतमेव । तस्माद्राज्यं रक्षितुं राज्ञनि ब्रह्मचर्यं नितान्तमावश्यकम् । आचार्योऽपि ब्रह्मचर्यबलेनैव ब्रह्मचारिणो नियन्त्रयितुमलम् । चरित्रवन्तमाचार्यमवलोक्यैव समायान्ति विद्यार्थिनस्तदन्तिके । चरित्रहीनः शिक्षकस्तु ब्रह्मचारिणां कृते विषधरः फणी । शिष्यो गुरुमेवानुकरोति प्रतिपदम्, तस्मादाचार्येणापि परिपालनीयं ब्रह्मचर्यम् । कुमारिकाः पुनरस्यैव ब्रह्मचर्यस्यालौकिक्या शक्त्या योग्यं युवानं च पतिमधिगन्तुं क्षमाः । सतीत्वं ह्यङ्गनानामद्वितीयं धनम् । याः कुमारिकाः परिपूतमिदं धर्मं सहसा त्यक्तवत्यस्ता जातुचिदप्यार्यसन्ततेर्गृहश्रियो भवितुं नार्हन्ति । ब्रह्मचर्येणैव बलीवर्दा घासमदन्ति, वाजिनश्च संग्रामे जयमाप्नुवन्ति । अपि चास्यैव ब्रह्मचर्यस्य दुर्निवारेण प्रभावेण मृत्युं विजित्यामरा अमरतामापुः । इन्द्रोऽप्यनेनैव ब्रह्मचर्यबलेनैन्द्र्यमधिगतवान् । अथर्ववेदोऽस्य पूर्णं परिचयं प्रददाति तथाहि —

ब्रह्मचर्येण तपसा, राजा राष्ट्रं विरक्षति ।
आचार्यो ब्रह्मचर्येण, ब्रह्मचारिणमिच्छते ॥
ब्रह्मचर्येण कन्या, युवानं विन्दते पतिम् ।
अनड्वान् ब्रह्मचर्येण, घासमश्वो जिघत्सति ॥

ब्रह्मचर्येण तपसा, देवा मृत्युमुपाघ्नत ।
इन्द्रोऽपि ब्रह्मचर्येण, देवेभ्यः स्वःराडभवत् ॥ इति ॥

अथ च ब्रह्मचर्यस्य सेवनं धारणं च दीर्घजीवनस्य बीजम् । सम्प्रति समनुभूयतेऽन्यैवावस्था, ब्रह्मचर्याभाववशादद्य सर्वत्रैव भारते रोगशोकदुःखदारिद्र्यादीनामकाण्डताण्डवं सावेगं दृक्पथमवतरति । देशकालानुसारेण ब्रह्मचारी शिक्षामवश्यमधिगच्छति, परमृते ब्रह्मचर्यबलाच्छक्तिसंग्रहोऽसम्भवः । ब्रह्मचर्यं हि मानवजीवनमुन्नेतुमेकमसन्दिग्धं साधनम् । तद्यथा—

ब्रह्मचर्यमहिमा हि सुमतिमाधवीमाधवः, चित्तचकोरकचन्द्रिका, सुकविसूक्तिसुधासम्पादकः, दुरितविदारकः, विपदुपद्रवशमकः, सम्पदां निधानम्, विपदां तिरोधानम्, मुदां विधानम्, श्रेयस्सम्पादनसाधनानां प्रधानम्, बुद्धेः समाधानम्, अपि च निशान्तनिद्रेव, शैशवदशेव, हरिहरकथेव, अभिनवनायिकादृक्छटेव, कवीन्द्रवाणीव मानसममन्दानन्दसन्दोहे निमज्जयति । अन्यच्च सुपुत्रहीनं हर्म्यमिव, शीलहीनं कुलाङ्गनारूपमिव, रुजाक्रान्तं ललनालावण्यमिव, चन्द्रहीना यामिनीव कान्तहीना कामिनीव, विगतसरोजं सर इव, सौरभशून्यं कमलमिव ब्रह्मचर्यहीनं जीवनं वैदुष्यसौन्दर्यकौलीन्याढ्यत्वप्रभृतिनानाविधगुणसमन्वितमपि नितरां निन्दनीयं सत् यशसस्तेजसस्तपसोऽपात्रम्, दौर्गत्यस्याश्रयः, विपदां पदम्, परिभूतेः परमं स्थानं सुतरां संजायतेतराम् । किम्बहुना बन्धुजीवपादपः समस्तं विपिनमिवैकोऽपि ब्रह्मचारी विश्वं विश्वं परिपवितुं परिभूषयितुं च सर्वथाऽलमिति शम् ॥

# संस्कृत-भाषा

( ले०:—पं० बज्जीनाथः, श्रीरघुनाथमहाविद्यालयः जम्मू )

पश्यन्ती स्थविर-प्रजापति-कृतिं संरक्त-वक्त्राम्बुजा ।
सद्यस्ततत्कृत-सृष्टि-संकवलनं कर्तुं समीहावती ।
त्रिभ्यद्भिः ससुरासुरैर्मुनिगणैः संस्तूयमाना द्रुतगाद् ।
वीणाध्वान-कृत-प्रसाद-विवृतिर्वागीश्वरी पातु नः ॥

ब्रह्माण्ड चक्रसंचालिकेयं प्रकृतिरेव सर्वेभ्यः स्थावरजङ्गमेभ्यो भूतेभ्यः काले काले आवश्यकतानुसारं सर्वां शिक्षां प्रदत्ते । पूर्वं मनुष्या अपि नग्नाः, पशुचर्मकृतपरिधाना वा पाशविकया वृत्त्या पिशितेनैव स्वकीयोदरपूर्तिं कुर्वाणाः कन्दरास्वेव न्यवसन् । तदानीं तैर्हस्तादिचेष्टाभिरेवाभिप्राया आविष्क्रियन्ते स्म । तदनन्तरं स्वयमेव शनैः शनैर्गृहादिनिर्माणं, कृष्यादिकर्म, और्णकार्पासादिवस्त्रसम्पादनं, शब्दप्रयोगो लिपिप्रयोगश्च पूर्वं भारतीयानां मनुष्याणां बुद्धावाविरभूत् । पश्चात्तेभ्य एव ग्रीकप्रभृतिभिः पाश्चात्यैः शिक्षितम् । याते च कस्मिंश्चित् काले तपस्तप्यतां संजातबुद्धिवैशद्यानां भारतीयानां महर्षीणामन्तःकरणेषु वेदोपनिषदादयो निगमाः प्रादुरभूवन् । तदनन्तरमन्येऽपि महर्षयो विविधानि शास्त्राणि निर्ममिरे । तदानीमेव शाकटायनगार्ग्यापिशलिपाणिनिप्रभृतिभिर्वैयाकरणैर्धातुसुप्तिङ्कृत्तद्धितसमासादीन् सम्यग् विविच्य पदानां साधुत्वासाधुत्वनिर्णयं च विधाय तदानीमुच्यमाना भाषा साधु संस्कृता । अत एवास्या भाषायाः संस्कृतमित्यभिधानम् । कतिपयवर्षकोटित आरभ्याद्ययावन्महद्भिः कविपुङ्गवैर्विद्वद्वर्यैश्च विविधकाव्यशास्त्रनिर्माणेनेयं भाषा तथालंकृता यथेदानीं भारतवर्षस्य दीनदशायामपि न काचिदपरा भाषा एतस्याः साम्मुख्येऽवस्थातुं शक्नोति । अतः सर्वासामपि भाषाणां मध्ये इयमेव गरीयसी । तदस्या गुणप्रकर्षस्य कश्चिदत्यल्पीयानंशोऽत्र प्रदर्श्यते ।

अथाशेषविद्याधिष्ठानभूतोमापतिसंस्कृतसुवर्णघटितपदाद्यवयवा, सकलगुणगरिष्ठा, अखिलसहृदयहृदयकुमुदशरत्कौमुदी, पादसंवाहकैरिव पाणिनिपतञ्जलिप्रभृतिभिर्मुनिभिः प्रमृज्यमानपदा, विलक्षणतेजोलावण्यप्रसराकृष्टहृदयैरुपासकैरिव कपिलपाराशर्यजैमिनिभरतप्रभृतिभिस्तत्त्वदर्शिभिः स्वनिर्मितशास्त्रोपहारैः समभ्यर्च्यमाना, संस्तावकैरिव मम्मटाभिनवगुप्तपादप्रभृतिभिर्गुणज्ञैः प्रशस्यमानगुणग्रामा, सैरन्ध्रीभिरिव वाल्मीकिव्यासकालिदासप्रभृतीनां भारतीभिरलंक्रियमाणाशेषशरीरावयवा, तेजःप्रसरप्रतिहतैरिव मुकुलितनयनैर् 'एड्विन एर्णोल्डाप्रभृतिभिः प्रतीच्यैर्दूरादेव नमस्क्रियमाणचरणसरोजयुगला, अखिलसुरासुरमनुजमनोमन्दिराधिष्ठातृदेवतेयं संस्कृतसाहित्यदेवता कैर्मनीषिभिर्न समभ्यर्च्यते संस्तूयते वा ।

यतो हि—पृथिव्यादिपञ्चमहाभूतव्यतिरेकेणैव संजातेयं देवता नितरामितराभ्यो देवताभ्यो विलक्षणस्वरूपा । तथाहि—

व्याकरणनिरुक्तोभयमेवास्याः सुदृढं जङ्घायुगलम् । गुणालङ्कारविस्तरावेवैरावतकरायाममुपहसन्तावस्याः सुमनोहरावूरुस्तम्भौ । वाङ्मयमेवास्याः शरीरम् । ज्योतिषमेवास्याश्चक्षुः । छन्दःशास्त्रमेवास्या वागिन्द्रियम् । सांख्यवेदान्तादिशास्त्रजातमेवास्या अन्तःकरणम् । उपनिषद्ग्राम एवास्याः प्राणवायुः । चतुर्वेदसमूह एवास्या अन्तरात्मा । सकलानपि जनान् धर्मोपदेशामृतरसं पाययन्तौ, काव्यरसलावण्यमण्डितौ, पुराणेतिहासावेवास्याः सुमनोहरौ कुचकलशौ । अलङ्कारशास्त्राण्येवास्या मण्डनानि । कविताविलासा एवास्या लावण्यनिर्भराः । रसभावादय एवास्या दृग्विलासाः । स्मृत्यादिधर्मशास्त्रमेवास्याः सुवचनामृतम् । कमलयोनिसुता एवास्याः सखी । न्यक्कृतनन्दनचैत्ररथा, भूलोकतिलकभूता, कश्मीरभूमिरेवास्या विहारवाटिका । तदेवंस्वभावेयं संस्कृतसाहित्यदेवता रक्षःपिशाचयक्षभूतादीनामपि मनांसि बलाद्धरति, का वार्ता पुनः सहृदयानां, विदुषां गुणज्ञानां, सभ्यानां च जनानां, देवगन्धर्वकिन्नरादीनां च स्वभावादेव रसिकानाम् ।

# पाश्चात्यानां वैदिकभाष्यसरणिः

( सङ्कलयिता :—सहगलोपाह्वः सीतारामशास्त्री, एम. ए. एम. ओ. एल्. )

ऋग्वेदो हि नूनं जगतामादिमा कृतिः। क्षेत्रेऽस्मिन् विविधशास्त्रपारदृश्वानः प्राच्याः पाश्चात्याश्च विद्वांसश्चिराय भाष्याणि रचयाम्बभूवुः। भारतीया अनेककृच्छ्राणि वामा दशाश्च सहमाना वेदोपकरणानि स्वल्पानि रचितुं प्राभवन्[1]। तान्येव अल्पानि साधनानि आश्रित्य वैदिकवाङ्मयमूर्द्धन्यभिषिक्ता यास्कस्कन्दोद्गीथसायणप्रभृतय आचार्यपादाः स्वस्वभाष्याणि अग्रथनन्।

अद्यतनाः पण्डिता वैदिकभाषावस्थातो नितरां सुदूराः। वेदभाष्ये तत्साहसं सूचिभेद्ये तमसि अन्वेषणमिव। तथापि 'अलभ्यं हि मनोहारि' इति सदुक्तिमनुसृत्य पूर्व-पश्चिमौ दिवानिशं कृतप्रयत्नौ। सर्वे विद्वांसः स्वमतानुसारीणि भाष्याणि अरचयन्। ते च द्विधा विभक्तुं शक्यन्ते। एको ब्राह्मणवेदाङ्गश्रद्धोऽन्यो भाषाविज्ञानसमालोचनपरः।

प्राचां पण्डितानां परम्परागतवर्त्मश्रद्दधानानां मते वेदोऽपौरुषेयः। अथ ब्राह्मणवाङ्मयकाले तैस्तैर्मनीषिभिर्वेदा यज्ञकर्मपरा अमानिषत। 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति बौधायन-कात्यायनापस्तम्बाद्याचार्यैः स्वस्वकल्पसूत्रेषु निःशङ्कमुदघोषि। इत्थम् अस्य महतो भूतस्य निःश्वसितमेतद्—इतिहासः पुराणं विद्या उपनिषदः श्लोकः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निःश्वसितानीति[2] वचांसि प्रसिद्धानि।

---

[1] नेदमस्माकं मतम्। वयन्तु अखण्डितां श्रुतिपरम्पराम् (Unbroken tradition) आद्रियामहे। वैशद्यार्थम् आचार्यविधुशेखरशास्त्रिणाम् 'Vedic Interpretation and Tradition' (Oriental conf. Patna 1930) इति-शीर्षात्मको लेखो द्र.

[2] बृहदारण्यकम् २।४।१०

अपरे वेदभाष्यकाराः पाश्चात्यास्तद्वातावरणप्रभावितधियः प्राच्यभाष्यसरणिमाशङ्कन्ते। तेष्वपि 'मुण्डे मुण्डे मतिर्भिन्ना' इत्युक्तदिशा बहुमतानि सन्ति। पूर्वं H. H. विल्सनमहाशयेन सायणवेदार्थप्रकाशे श्रद्दधानेन तदनुरूपं सकल ऋग्वेद आङ्गलभाषायामन्ववादि।

[1]शर्मण्यदेशस्थेन रोठाचार्येण (Roth) तस्यानुवादे भूयांसो दोषाः पर्यवेक्षिषत। साम्प्रदायिकं वर्त्म तेन दूरतो रमणीयममानि। निरुक्ततुलनात्मकशैलीमाश्रित्य तेनाम्नायोऽन्ववादि। एकार्थवाचीनि हि नैगमानि पदानि समचायिषत। तानि च क्रमशोऽलापिषत प्रकरणपरम्परां च दृष्ट्वा पदानां भिन्नावस्थासु अर्थान्तरं प्रतिशब्दमितिहासोऽलेखि। एवं तेनाचार्येण साम्प्रदायिकभाष्याणि भृशमपाभाषिषत। स्वसाधनानि च सत्यापितानि। परं तस्य दृढो यत्नस्तदनुयायिनां मनःसु पुष्कलां श्रद्धां नोत्पादयितुमक्षमत।

यूरोपभूखण्डे वर्धमाने वेदाभ्यासेऽन्यानि तदनुसन्धानोपकरणानि अलभ्यन्त। परम्परागतविधिमन्वेषणात्मकं च मार्गं तत्रत्या विद्वांसः समुचितश्रद्धया वैदिकभाष्याय प्रायुञ्जत। अखिलानि वेदसाधनानि समालोचनात्मकदृशा व्यमृशन्। तेषामुपयोगितामनुपयोगितां च निरणायन्। तन्निश्चयश्चायम्।

ब्राह्मणग्रन्थाः—एते यागादिकर्मोपकारकाः समाम्नायस्य पौष्कल्येन अभिप्रेतमर्थं निर्वक्तुं नालं भवन्ति। अतः स्वभावतो वेदानामुद्देशतः सुदूराणि सन्ति एतानि ब्राह्मणानि मनोविलसितानर्थान्दर्शयन्ति। तद्यथा। 'कस्मै देवाय[2] हविषा विधेम' इति ऋचोऽर्थं [3]शतपथकारः कस्मै = प्रजापतये इति निर्ब्रूते[4]।

१. तु. 'Ghate's "Lectures on Rigveda" पृ० ८८ तमः पाठो द्र०?

२. ऋ १०।१२१।२।

३. शतब्रा ७।४।१।१९।

४. अत्र सायण :—अत्र किंशब्दोऽनिर्ज्ञातस्वरूपत्वात् प्रजापतौ वर्तते। यद्वा सृष्ट्यर्थं कामयते इति कः, √कमेर्डप्रत्ययः। यद्वा कं सुखं तद्रूपत्वात्क इत्युच्यते। अथवा इन्द्रेण पृष्टः प्रजापतिर्मदीयं महत्त्वं तुभ्यं प्रदाय अहं कः कीदृशः

ब्राह्मणान्तरं च 'हिरण्यपाणिः' इति सूर्यविशेषणं दर्शयद् गाथामेकामग्रथ्नात्। भाषासाद्रश्यमपास्य इदं स्पष्टं दर्शयितुं शक्यते यन् मन्त्रब्राह्मणयोर्मध्येऽस्ति असामञ्जस्यम्। येन ब्राह्मणकाराः समुचितं व्याख्यातुं नैव प्राभवन्। परमेतावता ब्राह्मणानामेकान्ततोऽनुपयोगिता प्रतिपादयितुं न शक्या। क्वचित् तच्छरणं महते फलाय कल्पते।

निघण्टुः—यास्कोक्तदिशाऽयं वैदिकवाङ्मयस्य स्वल्पकायः कोषः। तथा चास्य वेदाङ्गत्वमाचार्यैरुररीकृतमिति नाविदितं पाण्डित्यजुषां विदुषाम्। पञ्चाध्यायात्मकेषु अध्यायत्रयं नामाख्यातपरकम्। परं पर्यायैरस्य प्रतिपदवृत्तिर्दुरुहा। तद्यथा। वाङ्नामसु श्लोक-निविद्--ऋच्--गाथा--अनुष्टुप्पर्यायाणां वागर्थे सामान्यार्थोऽसम्बद्धः। शिष्टमध्यायद्वयं शब्दान्नैव निर्वक्ति।

निरुक्तम्—भगवान् यास्कः पूर्वेषां वेदव्याख्यातॄणामन्तिमो व्याख्याता। स समाम्नायस्य पदानि निर्वचनदिशा व्याचष्टे। तस्यैतत्साधनं क्वचित्प्रकरणविरोधि क्वचिच्च निराधारत्वं सूचयति। स एकं पदं प्रतिपादयन् तदेव बहुधा निर्ब्रूते, इत्थं[2] स 'नासत्यौ चाश्विनौ' इति व्याचक्षाणः सत्यावेव नासत्यावित्यौर्णनाभः, सत्यस्य प्रणेतारावित्याग्रायणः, नासिकाप्रभवौ बभूवतुरित्याह येनास्य परम्परागतव्याख्यासाधनशून्यता स्पष्टं प्रतीयते। कदाचित्तत्तर्कः प्रसादयति। अन्यथा श्रद्धामपहरति। आचार्येण सप्तदशसंख्याकानां[3] पूर्वेषामा-

स्यामित्युक्तवान्। स इन्द्रः प्रत्यूचे यदीदं ब्रवीषि, अहं कः स्यामिति, तदेव त्वं भवेति। अतः कारणात् क इति प्रजापतिराख्यायते।

१. (निघ. १, ११)                    २. ( नि ६।१३ )

३. आग्रायणः नि० १।९;६।१३ औदुम्बरायणः नि० १।१ औपमन्यवः नि० १।१; २।२;६।११; ३।८ और्णवाभः नि० २।२६; ६।१३; कात्थक्यः नि० ८।५; ६; कौत्सः नि० १।१५ क्रौष्टुकिः नि० ८।२ गार्ग्यः नि० १।३; १२; ३।१३ गालवः नि० ४।३ चर्मशिराः नि० ३।१५, तैटिकिः नि० ४।३; ५।२७ वार्ष्यायणिः नि० १।२ शतवलाक्षः नि० ११।६ शाकटायनः नि० १।३; १२, १३ शाकपूणिः नि० २।८; ३।११ शाकल्यः नि० ६।२८ स्थौलाष्ठीविः नि० ७।१४;

चार्याणां नामान्युद्धृतानि । 'नैको मुनिर्यस्य वचः प्रमाणम्' इत्याप्तोक्तिदिशा भिन्ना मतयः। कौत्सस्तु[1] वेदमामूलाच्छङ्कते। किंच नैरुक्तैतिहासिकयाज्ञिक-पारिव्राजकादीनां मतोद्धरणाद् दृढं प्रतीयते यन्महर्षियास्कसमयात्प्रागेव वेदभाष्ये मतैक्यं नासीत्।

परमेतेन नेदमागतं भवति यद्यास्कस्य प्रयत्नोऽनर्थक उपजीव्यशून्यश्च । 'इति ह विज्ञायते' 'इति ह ब्राह्मणम्' इत्युक्तदिशा ब्राह्मणानुसारं निरुक्तम्। तस्योद्धृतभागा अस्माकं दौर्भाग्याल्लब्धुं[2] । असंशयं यास्कः स्वमतं परमतेन दृढयति । वृत्रपदं निर्ब्रुवाणः स आह[3]—

तत् को वृत्रः ? मेघ इति नैरुक्ताः। त्वाष्ट्रोऽसुर इत्यैतिहासिकाः । अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते । तत्रोपमार्थेन युद्धवर्णा भवन्ति । अहिवत्तु खलु मन्त्रवर्णा ब्राह्मणवादाश्च । विवृद्ध्या शरीरस्य स्रोतांसि निवारयाञ्चकार । तस्मिन्हते प्रस्यन्दिर आपः ।

किञ्च—[4]

'पञ्चजनाः' इति पदं व्याचक्षाणः 'गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके, चत्वारो वर्णा निषादः पञ्चम इत्यौपमन्यवः'। इति पूर्वेषामाचार्याणां प्रमाणैः स्वमतमपुष्णात् ।

अपरत्र[5]—

अयं मन्त्रार्थचिन्ताभ्यूहोऽभ्यूळहः । अपि श्रुतितोऽपि तर्कतः। नतु पृथक्त्वेन मन्त्रा निर्वक्तव्याः। प्रकरणश एव तु निर्वक्तव्याः। न ह्येषु प्रत्यक्षमस्त्यनृषेरतपसो वा। पारोवर्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवतीत्युक्तं पुरस्तात्। मनुष्या वा ऋषिषूत्क्रामत्सु देवानब्रुवन्। को न ऋषिर्भविष्यतीति। तेभ्य एतं तर्कमृषिं प्रायच्छन्मन्त्रार्थचिन्ताभ्यूहमभ्यूळहम् । तस्माद्यदेव किंचानूचानोऽभ्यूहत्यार्षं तद्भवति"।

१०।१ इत्यादि द्र०

१. ( नि १।१५–१६ )

२. तु० वटकृष्णघोषनिबद्धः "Collections of the fragments of lost Brahmanas" ग्रन्थो द्र.

३. नि २।१६ ४. नि ३।८ ५. नि १३।१२

इति गरीयसीं वाचं ब्रुवाण आचार्यो मन्तव्यो भवति। अथ प्राच्यमतस्य निराधारतां दिदर्शयिषतो रोठाचार्य्यस्य मतमपास्तमिव भाति।

सायणाचार्यो वेदार्थप्रकाशभाष्यकृद् यास्कात्सहस्रवर्षद्वयानन्तरं समुत्पेदे। स स्कन्दोद्गीथमहेश्वरादीनामाचार्याणां भाष्याणि स्वभाष्यार्थमुपयोजितवान्। तेन बहुत्र यास्क उद्धृतः। परं कुत्रचित्स्वमतभेदोऽपि प्रदर्शितः। तद्यथा "शासद्वह्निर्दुहितुर्नप्त्यं गात्।"[1] इति मन्त्रे 'शासत्' पदं क्रियात्वेनाह यास्कः[2]। √शासेः शतरि अभ्यस्तत्वान्नुमभाव इति सुस्पष्टं व्याचष्टे सायणः। किञ्च 'दनो विश इन्द्र मृध्रवाचः'[3] इति निगमे 'दनः' इति पदं क्रियावल्लपितवान् सः। यास्कश्च[4] विशेषणत्वेन। अथापि "दस्रौ" "दर्शनीयौ" इति यास्कः। 'शत्रुनाशकौ' इति सायणः। किञ्च 'कनिक्रदत्'[6] इत्यत्रोभौ भाष्यकारौ विरुन्धाते। 'व्यक्रन्दीत्' इति व्याचक्षाणो यास्क[7] आख्यातपदमाह। 'पुनः पुनः शब्दायमानः' इति निर्ब्रुवाणः सायणः शत्रन्तं व्याकरोति। एतेन स्पष्टं भवति यत्कूटपदानां भाष्ये यास्कसायणौ भिन्नमतौ। तौ चोभौ वैदिकोपजीव्यशून्यौ वातावरणरहिताविव लक्ष्येते। लौकिकपुराणशास्त्रेण भाषया च निगमान् व्याचक्षाणः सायणोऽशोभमान इव भाति। 'इदं विष्णुर्विचक्रमे'[8]। इतिमन्त्रे 'विष्णुः—त्रिविक्रमावतारधारी, इदं-प्रतीयमानं सर्वं जगदुद्दिश्य, विचक्रमे विशेषेण पादक्रमणं कृतवान्'। इति विष्णुपुराणगतया गाथयाऽऽलप-

१ ऋ ३।३१।१

२ नि ३।४ प्रशास्ति

३ ऋ १।१७४।२ =अदमयः।

४ नि ६।३१ =दानमनसो मनुष्यान्।

५ तु० Muir निबन्धः "on the Interpretation of the Veda" (JRAS 1866 P 18) कणेहत्य द्र.

६ ऋ २।४२।१

७ नि ९।४

८ ऋ १।२२।१७

नमितिहासज्ञानाभावं द्योतयति। यास्कश्च तमेव निगममन्यथा निर्ब्रूते।[1] सायणः 'अधिनिर्णिजः[2]' इति समस्तं पदं निर्णिजः-आत्मीयान् रश्मीन् अधिश्च गतित्वेन व्याचख्यौ। पदशास्त्रविरुद्धमिदं तत्साहसम्। 'दोधुवत्[3]' इति शत्रन्तं रूपं क्रियात्वेनाह। वैदिकसाहित्यलब्धप्रतिष्ठौ ग्रासमानमोनियरविलियमकोविदौ स्वरशास्त्रानुसारं पदमिदं शत्रन्तत्वेन निरब्रूताम्। 'बाधतामू[4]' बाधमानानाम्, इति शत्रन्तत्वेन व्याचक्षाणः सायणः पुनश्चिन्त्य इव। अन्यत्र[5] तेनैव आख्याततत्वेन व्याख्यानात्। एतावता सायणभाष्यमेकान्ततो न दुष्यति। शर्मण्यदेशजन्मानौ पिशलगैल्डराख्यावुभौ (Pischel, Geldner) विद्वन्मतल्लजौ तं मुक्तकण्ठमश्लाघेताम्। रोठाचार्यस्य च बहून् दोषान् समधत्ताम्। तद्यथा। 'पुरीष[6]' पदमुदकपर्यायत्वेन सायणेन क्वचिद् व्याख्यातम्। तदवलम्ब्य रोठाचार्यखण्डनं पिशलगैल्डराभ्यां सुतरां समधायि।

श्रुति (tradition) मन्तरा सन्ति अपराणि आधुनिकानां वैदिकपण्डितानां साधनानि। तानि संक्षिप्येह दर्शयामः।

अवस्ता-पारसीधर्मावलम्बिनामयं धार्मिको ग्रन्थः। भाषादृष्ट्या स बहुत्र ऋग्वेदेन सह साम्यमावहति। यथा। असुरशब्द एव 'अहुर'-देवतावाची। मित्रनाम्नी देवता एव 'मिथ्र' पदेन व्यपदिश्यते। अथ सोमरचनाऽपि 'होमः' एव।

भाषाविज्ञानशास्त्रम्--शास्त्रमिदं वैदिकार्थनिश्चयाय बहु-

---

१ नि १२।१९

२ ऋ ८।४१।१०

३ ऋ ९।१५।४

४ तै सं. १।७।१३।४।

५ ऋ ६।४७।१२। √बाधेः परस्मैपदमसांहितिकम्। 'अपगमयतु'-उव्वटः 'निवर्तयतु'=महीधरः (मा २०।५१)

६ तु. Macdonell' "The Principles to be followed in translating the Rigveda" (Bhandarkar com. Vol 1917) प्रबन्धो द्र.

साहाय्यमादधाति। यथा। √पश् धातोः 'स्पश्' पदम् न तु √दृशे रूपम्। भाषान्तरेषु च 'spy' पदं प्रसिद्धम्।

तुलनात्मकपुराणशास्त्रम्-एतेन भिन्नानां देवतानां ज्ञानं सम्पद्यते। तासां गुणकर्माणि प्रविभज्य व्याख्येयानि भवन्ति यथा यमनाम्नी देवता 'अवस्ता' न्तर्गतदेवतयाऽऽनुरूप्यमावहति।

ऋग्वेदस्य व्याख्यानं समाम्नायस्य परीक्षया-तुलनात्मकाध्ययनैर्वैदिकव्याकरणस्वरशास्त्रैश्च भवितव्यम्। तच्छून्यस्य पदे पदे स्खलनं निश्चितम्। सकृत्प्रयुक्तस्य दुरूहनिगमस्य प्रकरण-निर्वचनशास्त्राभ्यां व्याख्यानं प्रशस्यतेतमाम्। पदपाठस्वरछन्दःशास्त्राणां विशिष्टं ज्ञानं समादरणीयं समादरणीयमिति।

---

# संस्कृतसाहित्यपरिषदो ज्येष्ठमासाधिवेशनकृत्यम्

ज्येष्ठमासस्य षड्विंशे मध्याह्नोत्तर-सार्धचतुर्वादने परिषदधिवेशनं सुसंपन्नम्। तत्र प्रथमं परिषदुपमन्त्रिणा विद्यावारिधिना पं०शिवनाथशास्त्रिणा मङ्गलपाठानन्तरं परिषत्कार्यं समारब्धम्। उपस्थितिश्च परिषत्सभ्यानां कार्याधिकारिणामेव केवलमासीत्।

ततः परिषन्मन्त्रिणा साहित्यालङ्कारेण पं०कुलभूषणेन सभाकार्यकथनानन्तरं 'श्री'पत्रिकासंस्करण-संशोधन-सञ्जीवनविषये लवपुरस्थश्रीपण्डित-विश्वबन्धुशास्त्रिणां महान् समुद्योगः प्रकटितः।

अनन्तरं पं०कमलनयनशास्त्री संस्कृतप्रधानाध्यापकः (गवर्नमैण्ट हाईस्कूल करनाल, पञ्जाब) ग्रीष्मावकाशे कश्मीरमागतोऽधिवेशनकाले परिषदि उपस्थितः "संस्कृतभाषाप्रचार एव धर्मवृद्धेः कारणम्" इति स्वव्याख्यानं स्वल्पेनैव कालेन समापयत्।

तदनु प्रधानमहोदयेन पं०जगद्धरजाड्डशास्त्रिणा एम. ए., एम. ओ एल्, प्रभाकरेत्यादिपदवीभाजा संस्कृतभाषाप्रचारविषये किञ्चिद् व्याख्याय अग्रिमेऽधिवेशने इममेव विषयमधिकृत्य व्याख्यानानि भवितार इति विज्ञापितम्, सभा च विसर्जिता।

परिषदुपमन्त्री।

# आधुनिकी दशा

ऋते राजनीतिकान्दोलनाद् युद्धस्य कथाया वा नास्ति संसारेऽन्यः कश्चिदपि विषयः कालेऽस्मिन् यस्मिन् मानवा अतिव्यग्राः स्युः । पाश्चात्यैर्योरुपद्वीपे तु प्रतिक्षणं नवीना घटना नवीनश्चाक्रमणं संदृश्यन्ते । इदानीं ब्रिटिनदेशाक्रमणमेव हिटलरेण (शर्मण्यनेत्रा) अहोरात्रं विचार्य्यते । जौलाईमासस्य २५तारिकायां शब्दा एते पत्रेषु प्रकाशिता अभूवन्, 'न जाने कदा इङ्गलैंडदेश आक्रान्तः स्यादित्यस्ति प्रतिक्षणं भीतिर्लोकानाम्' । शर्मण्यप्रदेशेन मई-जून-मासयोरेव योरुपद्वीपस्य ज़ैकोस्लोवेकिया-नारवे-डैन्मार्क-बैल्जियम-हालैंड-फ्रांसेत्यादयो देशाः पीडिताः पारतन्त्र्यञ्चोपनीताः । घोरेऽस्मिन् काले इङ्गलिशराज्यं, कनेडा-न्यूजीलैंड-दक्षिण-अफ्रीका-आस्ट्रेलियाप्रभृतयस्तत्सहकारिणो देशास्तथा चाङ्गलाधीनं भारतवर्षमस्माकं शर्मण्यानां विरोधे वर्तन्ते । यद्यपि भारते बहुषु प्रान्तेषु कांग्रेसीयैर्घोषणा कृतास्ति यद् यावद् भारतसम्राड् आङ्गल-राज्यं वा भारतीयं स्वातन्त्र्यं न प्रतिजानीते तावद् भारतवर्षमाङ्गल-राज्यस्य साहाय्यं नैव विदध्यात् तथापि क्रियात्मकरूपेण भारतवर्ष-स्य पराधीनत्वाद् धनेन जनेन च भारतमपि शर्मण्यानां विरोधे प्रतिक्षणं यतते । मनसापि पुण्या भूमिरियम् इङ्गलिशराज्यस्य हितायैव वर्तते केवलं स्वात्मरक्षां स्वात्मसम्मानं स्वात्माधिकारांश्च दृढीकर्तुं समय-विशेषं प्रतीक्षते । आशासे यद् भारतवर्षस्याङ्गलानाञ्च नेतारः सम-स्यामिमां शीघ्रमेव समादध्युः ।

## भारतीययुवकानां कर्तव्यम्—

आङ्गलशर्मण्ययोर्युद्धस्य कश्चिद् यावत् शोभनः परिणामो न भविष्यति तावद् भारतस्य दशाऽपि शोचनीयैव आस्ते । बहुत्र धूर्ता लुण्ठनं कुर्वन्ति स्त्रीपुरुषाणाम्, व्यक्तिरूपेण जातिभेदेनापि लोकाः पीड्यन्ते । पञ्चाम्बुप्रान्ते तु विभिन्नजातीयानां पारस्परि-कान्तरिकद्वेषेण महानुपद्रवस्तत्तन्नगरेषु प्रतिदिनं दृष्टिपथमव-

तरति येन चानेके निरपराधिनोऽपि विधर्मिभिस्ताड्यन्ते, पीड्यन्ते, लुण्ठ्यन्ते, दह्यन्ते च । कतिपये दिवसा एव व्यतीता यदा गुजरांवाला-नगरे स० अवतारसिंहमहाशयो मुसलिमयुवकेनैकेन पथि अकस्माद् हतः । सरगोधानगरे च बहवो ग्रामीणामहमदीयाः शस्त्रास्त्रैः सज्जीभूता नागरान् आक्रम्य विलुण्ठ्य च तान् बहु पीडितवन्तः ।

गुजरांवाला-सरगोधानगरयोर् यद्यप्येतादृशी अवस्था विद्यते तथापि युद्धस्य भयङ्कररूपवर्धनेन न जानेऽत्र कीदृशी परिस्थितिः प्रवर्तेत । हर्षास्पदं यद् राज्याधिकारिभिः सर्वत्र नगररक्षासेवकानां (Civic guards) प्रतिष्ठापनाय यत्नः क्रियते । यद्यपि सर्वप्रान्तेषु भारते तथा महाराजानां देशेषु प्रबन्धा प्रारब्धाः संदृश्यन्ते तथापि हिन्दुयुवकानां कर्त्तव्यविशेषोऽपि द्विप्रकारको विद्यते । प्रथमं तु स्वजातीयानां युवकानां दृढं संघटनं विधाय स्वयंसेवकरूपेण सर्वत्र प्रान्तेषु नगरेषु ग्रामेषु च विभिन्नानां संस्थानां निर्माणं कुर्युः स्वयं-सेवकाः, प्रतिदिनं व्यायामार्थं सम्मिलिताश्च भवेयुः, यत्र कुत्रापि विवादः, आक्रमणं, दुःखं वा स्यात् सहसैव साहाय्यार्थमुपगच्छेयुः । स्वजातीयानामन्यजातीयानां वा सदैव धूर्तेभ्योऽवलुण्ठकेभ्यश्च रक्षाकरणे कटिबद्धा भवेयुः । द्वितीयं कर्त्तव्यं तेषामिदं वर्तते यद् भारतं स्वदेशं स्वीकुर्वद्भिर्महमदीयैः सह प्रेमवर्धने हिन्दुमुसलिमयोरे-कताप्रदर्शने च विशेषं यत्नम् कुर्युर्येन महमदीया हिन्दुजातिं प्रति ईर्ष्याद्वेषौ विहाय भ्रातृभावेन देशेऽस्मिन् निवसेयुः । अयमेव विद्यते श्रेयस्करः पन्था भारतहिताय । स्वधर्मे दृढो विश्वासः, स्वकर्तव्य-पालने भीष्मा प्रतिज्ञा, अन्यजातिधर्मानुयायिभिः सह प्रेम्णा व्यवहारो हिन्दुनवयुवकानामाचारो भवतु । संकटसमये धूर्तानां दमन-मवश्यमेव कार्यं, परन्तु शान्तिसमये सर्वलोकहिताय सर्वेषु प्रचारः कार्यः ।

कुलभूषणः

## परिषदधिवेशनसूचना (१९९९ विक्रमाब्दस्य)

(ले०-पं० शिवनाथः शर्म्मा उपमन्त्री सं० सा० परिषदः कश्मरिस्य)

प्रायशोऽस्मिन् वर्षे यथाकालं मासिकाधिवेशनानि नैव समभूवन् परिषदनाह्वानाद् वा उपमन्त्रिमन्त्रिमहाभागानां प्रचुरतरराजकीय-कार्यभारसंलग्नत्वाद्वा।

प्रथममधिवेशनं वैशाखे प्र० रविवासरे सायं तृतीयवादनसमये हिन्दु-सहायकसभामन्दिरे महता समारोहेण समपद्यत। काश्मीरिकाणा-मुत्साहशालिनां विदुषां छात्राणाञ्च नापह्नवीयोपस्थितिरासीत्। प्रथमं मन्त्रिमहोदयेन "महायुद्धंतस्य परिणामश्च" इमं विषयमुररीकृत्य नातिमहता सन्दर्भेण साधु सुष्ठु च सारगर्भितं व्याख्यानं दत्तम्। येन सभया सन्तुष्टया हर्षपूर्णाभिर्गगनव्यापिनीभिस्तालिकाभिः प्रत्युत्तरं दत्तम्। अनन्तरं मोहमयीस्थसंस्कृतविश्वविद्यालयनिर्मितौ तन्निर्मातृमहाभागान् धन्यवादेन सत्कृत्य तद् विश्वविद्यालयस्य कार्यप्रणाली मोददात्री व्याख्याता परिषदुपमन्त्रिणा। प्रधानवर्ये-णापि सुललितैः पदविन्यासैर् नातिदुरूहैः सारवद्भिश्च प्रत्नग्रन्थ-रक्षाविधौ प्रयत्नकार्यमधिकृत्य आबालवृद्धं घोषणा कृता। छात्रैश्च बहुभिर्विविधविषयेषु स्वलेखाः संश्राविताः। तदनन्तरं मन्त्रि-महोदयेन सभासदः मिष्टान्नेन चायपानेन च सत्कृताः। ततः प्रधानवर्य्याज्ञया हर्षोत्फुल्ला सभा विसृष्टेति।

तृतीयमधिवेशनमाषाढमासस्य २१ तारिकायां चतुर्वादनसमये सायं समभूत्। मन्त्रिवर्य्येण तत्र "वार्तमानकालिकी परिस्थितिः" स्वबुद्धिचातुर्येण विशदीकृता। प्रधानवर्येणापि "संस्कृतं राष्ट्रभाषा भवेन्न वा" इमं विषयं दार्शनिकदृष्ट्या सांसारिक-रीतिनीतिकलापेनस्वालौकिकबुद्ध्या च सम्यग् दर्शयित्वाऽऽहृतमस्ति-का परिषत्संपादिता। तदनु अन्यान्यैः संस्कृतपण्डितैर्विद्यार्थिभिश्च यथारुचि केचन विषया महता बुद्धिगौरवेण परिषत्सन्तोषाय

व्याख्यानदानेन यथाशक्ति सम्यगुपवर्णिताः । ततो मन्त्रिवर्य्यप्रदत्त-कषायपानदानानन्तरं प्रधानमहोदयेन परिषद्विसर्जिता ।

## हर्षोऽहर्षश्च ।

परिषदोऽस्या रक्षकाः पोषकाः संस्थापकाश्च मान्या मन्त्रिवर्य्याः सुरभारतीसमुद्धरणैकव्रताः श्रीपं०कुलभूषणाभिधेया भिषगाचार्याः स्वकीयां राजकीयकार्यपदवीं (हेल्थ ओफिसर काश्मीर) कार्यरूपेण बहुमानपुरःसरं नागरिकजनमनःसन्तुष्टिकरीं सम्यक् सुसंपाद्य नियतसमये गताषाढमासे कार्यभाराद्विश्रान्ता इति नागरिकाणामस्माकं नरपति-जनपदसंतोषणक्षमाणामेतादृशानां कार्यभार-वहनसमर्थानामस्मिन्नेतादृशे पदवीसंसाधनेऽन्यस्यातीव दुर्लभत्वा-दहर्षः ।

राजकीयकार्यभारसंसक्ता अपि तत्रभवन्तोऽवर्णनीयां सेवां संस्कृतसाहित्यपरिषदोऽस्याः संस्कृतसाहित्यस्य च नितरामकुर्वन् । आशास्महे च सर्वे वयं परिषत्सभ्याः सपण्डितमण्डलीका यत्तत्र-भवन्तो भवन्तः पूर्वस्माद् द्विगुणां हार्दिकीं वृत्तिं साहित्यपरिषज्जीवनार्थं 'श्री' पत्रिकावृद्ध्यर्थं संस्कृतसाहित्यवृद्धये च करिष्यन्तीति हर्षः ।

## ज्यैष्ठमासिकं कार्यम् ।

परिषदोऽस्या ज्येष्ठमासस्यैकविंशतिप्रविष्टे मासिकमधिवेशन-मभूत् । विवाहोत्सवकार्यसंसक्तेष्वपि जनेषु परिषदि श्रोतृगणसंख्या नातिन्यूनासीत् । तत्र पूर्वं सभापतिमहोदयेन परिषत्कार्यस्यानन्तरं सरलैः शब्दप्रयोगैः "प्राचीनपुस्तकपरिसंख्या" इतिशीर्षकेण व्याख्यानेन सभ्या आनन्दिताः । तदनु परिषदुपमन्त्रिणा "भारत-मञ्जरी" इतिशीर्षको लेखः पठितः । महेश्वरनाथेन च "मन एव मनुष्याणां कारणं बन्धमोक्षयोः" इदं पद्यार्धमवलम्ब्य लेखः पठितः । तदनन्तरं प्रधानवर्यैः सभाविसर्जनं कृतम् । आगाम्यधिवेशने च श्रीयुत-चमनलालकपूर एम. ए. महोदयस्य "ब्राह्मी लिपिः" इति विषये व्या-ख्यानं भविष्यतीति निश्चितं प्रधानवर्य्यैरिति सूचयति परिषदुपमन्त्री ।

# संस्कृत-साहित्य-परिषदः श्रीनगरस्य भारतधर्म-महामंडलीयो-पाधिवितरणोत्सवः ।

विक्रमाब्दस्य १९९७ सौराषाढमासस्य सप्तमदिवसे परिषदधिवेशनं महता समारोहेण समपद्यत। भारतधर्ममहामण्डलस्य प्रधानवर्यैः रायबहादुर-श्रीविक्रमसिंहैः काश्मीरं जलवायुपरिवर्तनार्थमागतैः सभायाः प्रधानपदवी स्वीकृतासीत् परं दैवयोगेन रायबहादुरमहोदयाः जङ्घपीडारोगेण ग्रस्ता अभूवन्। तेषामनुपस्थितौ भारतधर्ममहामण्डलस्य प्रधानमन्त्रिमहोदयैः कश्मीरराज्यस्य शिक्षाविभागे भूतपूर्वमन्त्रिभिः श्री आर० डी० पोंड इति विख्यातैरुपाधिवितरणं कृतम् ।

श्रीमद्भिः पं०जगद्धरजाड्डुभिः प्रधानमहोदयैर् भारतधर्ममहामण्डलस्य शीर्षकपत्रन्तथा तेषां मानपत्रम् (यत् तैः परिषदः प्रधानपुरुषाय सभाया मन्त्रिमहोदयाय **डाक्टरपण्डितकुलभूषणाय** प्रेषितमासीत्) पठितम् । मानपत्रे च तस्मिण् डाक्टरमहोदयस्य गीर्वाणवाणीप्रेम्णा प्रेरितस्य श्रीपत्रसंपादकत्वं वर्णितमासीद् येन वाराणस्याः पण्डिताः प्रमुदिताः सम्मिल्य प्रमाणपत्रमदुः, संस्कृतभाषासेवायै काश्मीरेषु प्रचारोद्योगाय साहित्यालङ्कारपदवीञ्चार्पयामासुः । द्वितीयं मानपत्रं हिन्दीभाषायां पं०मुकुन्दरामशास्त्रिभिः काश्मीरेषु हिन्दीभाषासेवार्थं प्राप्तम् । तेन साकं 'विद्यावारिधिः' इत्युपाधिश्चोपलब्धः। अधिवेशनेऽस्मिन् संस्कृत-भाषोन्नतिः कथं स्यात्, इति विषयमवलम्ब्य पं०शिवनाथशर्मणां पं०कर्मनारायणशास्त्रिणां पं०जगद्धरजाड्डूनां च व्याख्यानानि समभूवन् पं०निरञ्जनहुरड्डुना कविता पठिता । पं०कुलभूषणेन परिषन्मन्त्रिणा भारतधर्ममहामण्डलस्य महती कृतज्ञता दर्शिता तथा च स्वकीयसंस्कृत-प्रयत्नस्य काचिद् वार्ताऽपि श्राविता ।

तदनन्तरं च हिन्दीभाषायां पं०कर्मनारायणशास्त्रिणा निम्नलिखितः प्रस्तावः सभास्वीकारार्थं पठितः यश्च पं०दयारामेण तथा च श्री-बलवन्तसिंहेन बी. ए. बी. टी. इत्युपाधिधारिणा भूतपूर्वशिक्षाध्यक्षेणाऽ-नुमोदितः ।

'कश्मीरराज्ये हिन्दीभाषापठनं हिन्दुबालबालिकाभ्य आवश्यकं स्यात्। तथा च पूर्वो नियमः यो डाक्टरमित्रवर्येण गृहमन्त्रिणा (Home member) स्वीकृत आसीत् स एव नियमो राज्यशिक्षा-विभागेषु क्रियात्मकरूपेण हिन्दीभाषायाः कृते प्रचलितो भवेद् येन यत्र हिन्दवो हिन्दीभाषायां शिक्षां प्राप्तुं समुत्सकाः स्युस्तत्र तेषां कृते हिन्दीभाषा माध्यमिकी भवेत्।

(पं० गोविन्दराजदानः एम. ए. शास्त्री)

## सरस्वतीसमाजीयं विशेषाधिवेशनम्

मईमासारम्भ एव सप्तम्यां तारिकायां भौमवासरे श्रीपाञ्चनदसरस्वती-समाजस्य विशेषाधिवेशनं डी. ए. वी. हाईस्कूलीयहंसराजभवने प्रवृत्तम्। रायबहादुरश्रीमुकुन्दलाल 'पुरी' महोदयाः सभापतिपदमलमकुर्वत। भूयसां लवपुरीयाणां नैकेषां च बाह्यवर्तिनां विदुषां प्रमोददः सम्मर्दः समपद्यत। सर्वसम्मत्या चाधोनिर्दिष्टाः प्रस्तावाः स्वीकृता अभूवन्—

१. बहुशोऽनुभूतचरमिदं यद् एफ. ए., बी. ए., एम. ए. कक्षासु संस्कृत-पाठ्य-शिक्षणमाङ्गलभाषामाध्यमेनातिमात्रमसफलं वृत्तम्। अधीतसमस्तवैदे-शिकवाङ्मयोऽपि न तथालम्बोभवीति शिक्षणे जनो यथानायासनिसर्गप्रवृत्त-मातृभाषयेति हिन्दीमाध्यमेनैवास्याधिवेशनस्य सम्मतौ यावताऽपि संस्कृत-शिक्षणेन भाव्यम्।

२. अद्यत्वे हि प्रायशः पाञ्चनदशिक्षणपद्धतिमजानन्त एव सुदूर-प्रान्तीया विद्वांसः परीक्षकाः सम्पाद्यन्ते। ते च न केवलं प्रश्नानेव दुरवगमान्दुरूहांश्च पृच्छन्ति, अपितु सञ्चिकासमीक्षायामपि कठोरतां दर्शय-न्ति, येन संस्कृतच्छात्रा महतीं हानिमनुभवन्ति। अत इदमधिवेशनं सानुरोधं विश्वविद्यालयीयाधिकारिवर्गं प्रार्थयते यत् पाञ्चनदसंस्कृत-शिक्षणपद्धतिं विद्वांस एव विपश्चितः परीक्षकत्वसम्मानेन समाद्रियेरन्निति।

३. यथा खलु विश्वविद्यालयेनाङ्गलपरीक्षापरिणामघोषाय तिथिर्निश्ची-यते यथासमयं च सर्वैः खलु परिणामेनाववुध्यते न तथा हिन्दी-संस्कृत-परीक्षापरिणामाय क्रियत इतीदमनावश्यकं वैषम्यं नूनं विश्वविद्या-लयीयाधिकारिवर्गेण यत्नतः परिहर्तव्यम्।

अन्येऽपि बहवो हिन्दी-संस्कृतोन्नतिविषयकाः प्रस्तावाः सर्वसम्मत्या स्वी-अक्रियन्त।

परिषदः संयुक्तमन्त्री पं० अमरनाथः
शास्त्री व्याकरणाचार्य.

## सम्पादकसमितिः

पं० कुलभूषणः डी. पी. एच्. (लण्डन) साहित्यालङ्कारः (काशी)
पं० गोबिन्दराजदानः शास्त्री, एम. ए. एम. ओ. एल्.
पं० जगद्धरः "जाडू" शास्त्री, एम. ए. एम. ओ. एल्.
पं० शिवनाथः शास्त्री साहित्य-भूषणः, साहित्यमणिः

# संस्कृतसाहित्यपरिषदः

## श्रियश्च नियमाः

**उद्देश्यम्—**

परिषदोऽस्याः संस्कृतभाषार्यसभ्यताप्रचारात्मकः केवलमेक एव

**प्राप्तिशुल्कम्—**

श्रीनगराद्बहिः सपादरूप्यकम् १।)

श्रीनगरीयेभ्यः पारिषदेभ्यस्तु रूप्यकमेकम् १)

**सदस्याः—**

संस्कृतभाषानुरागिणः पत्रशुल्कं प्रेष्य सदस्या भवन्ति ।

**साहाय्यम्—**

श्रीपत्रिकाप्रकाशने वहुधनमपेक्ष्यते मूल्यन्त्वस्या नाममात्रमेव ।

**विशेषसूचना—**

पत्रिकाप्रकाशनेऽत्यधिकव्ययकारणेन संस्कृतोद्धारप्रणयिनो जन्मभूमिभाषाप्रचारकटिबद्धा महानुभावाः साहाय्यार्थं सविनयं प्रार्थ्यन्ते । कृपया ते दानरूपेण धनं वितरेयुः ।

**पत्रप्रकाशनसमयः—**

त्रैमासिकमिदं पत्रं सौरीयेषु आषाढाश्विनपौषचैत्रेषु क्रमशो निर्गच्छति । पत्रप्रकाशनसमयादनन्तरमपि पत्रानुपलब्धौ सूचनया पुनरपि प्राप्यते पत्रम् । मासादनन्तरं तु न प्राप्यते ।

प्राप्तिस्थानम्—श्रीकार्यालयः, सुन्वारबाग श्रीनगरम् (काश्मीर)